CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 757

Title P. Yogaśāstra with
Rājamārtaṇḍa

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 757 Subject : Yoga

Title : P: Yogaśāstra with Rājamārtaṇḍa

Author : Bhojadeva. Scribe : Mādhavānanda Sarasvati

Date of the work : — Date of the Ms. : V.S. १८६१.

Place of the work : — Place of the Ms. Gupteśvara

Size : 8.8" by 5" Extent : 42 foll.

Language : Sanskrit. Script : Devanāgarī

Remarks : ——

नाडीशंकरनारग्रंथश्रईगयाहत्तातेपत्र ४ आपा गया छे
पत्र ५८ आपा गया छे

॥पातंजलशास्त्रंमाधवानंदसरस्वत्याः॥
॥प्र॰पा॰सू॰५१द्वि॰पा॰सू॰५५तृ॰पा॰॥
॥सू॰५६च॰पा॰सू॰३३॥
॥सूत्राणि१९५॥
॥ग्रंथसंख्या॥
॥१३४३॥

॥पा॰सू॰वृ॰॥ ः॥श्रीगणेशाय नमः॥ ॥अथ श्रीभोजदेवकृतराजमार्तंडाभिधपातंजलसूत्रवृत्तिर्लिख्यते॥ ॥
॥१॥ देहार्धयोगः शिवयोः स श्रेयांसि तनोतु वः॥दुःप्रापमपि यत्स्मृत्या जनः कैवल्यमश्नुते॥१॥त्रिविधान्यपि
दुःखानि यदनुस्मरणान्नृणां॥प्रयांति सद्यो विलयं तं स्तुमः शिवमव्ययं॥२॥पतंजलिमुनेरुक्तिः का
प्यपूर्वा जयत्यसौ॥पुंप्रकृत्योर्वियोगोपि योग इत्युदितो यया॥३॥जयंति वाचः फणिभर्तुरंतस्फुर
त्तमःस्तोमनिशाकरत्विषः॥विभाव्यमानाः सततं मनांसि याः सतां सदानंदमयानि कुर्वते॥४॥शब्दा
नामनुशासनं विदधता पातंजले कुर्वता वृत्तिं राजमृगांकसंज्ञमपि च व्यातन्वता वैद्यके॥वाक्चेतोवपुषां
मलः फणभृतां भर्त्रेव येनोद्धृतस्तस्य श्रीरणरंगमल्लनृपतेर्वाचो जयंत्युज्ज्वलाः॥५॥दुर्बोधं यदतीव त
द्विजहति स्पष्टार्थमित्युक्तिभिः स्पष्टार्थेष्वतिविस्तृतिं विदधति व्यर्थैः समासादिकैः॥अस्थानेनुप
योगिभिश्च बहुभिर्जल्पैर्भ्रमं तन्वते श्रोतॄणामिति वस्तुविप्लवकृतः प्रायेण टीकाकृतः॥६॥उत्सृज्य सर्वोपि
मिथ्या॰ विस्तरमुदस्य विकल्पजालं फल्गुप्रकाशमवधार्य विचार्य जातं॥संतः पतंजलिमते विवृतिर्मयेय
मातन्यते बुधमनःप्रतिबोधहेतुः॥७॥अथ योगानुशासनं॥अनेन सूत्रेण शास्त्रस्य संबंधाभिधे
यप्रयोजनान्याख्यायंते॥अथशब्दोधिकारद्योतको मंगलार्थश्च॥युजिर्योगः समाधानं॥युज समाधौ॥
अनुशिष्यंते व्याख्यायंते लक्षणभेदोपायफलैर्येन तदनुशासनं योगस्यानुशासनं योगानुशासनं॥तदाशास्त्र
परिसमाप्तेरधिकृतं वेदितव्यमित्यर्थः॥तत्र शास्त्रस्य व्युत्पाद्यतया योगः ससाधनः सफलोभिधेयः॥ ॥१॥
फले

व्युत्पाद्यस्य योगस्य साधनानि शास्त्रेण प्रदर्श्यंते तत्साधनसिद्धो योगः कैवल्याख्यं फलमुत्पादयतीति

तद्व्युत्पादनं च फलं॥व्युत्पादितस्य च योगस्य कैवल्यं फलं॥शास्त्राभिधेययोः प्रतिपाद्यप्रतिपादकभावलक्
णः संबंधः॥अभिधेयस्य योगस्य तत्फलस्य कैवल्यस्य च साध्यसाधनभावः संबंधः॥एतदुक्तं भवति॥
तत्र योगः क इत्याह॥ ॥योगश्चित्तवृत्तिनिरोधः॥२॥ ॥चित्तस्य निर्मलसत्त्वपरिणामरूपस्य याः वृत्तयो
अंगांगिभावपरिणामरूपास्तासां निरोधो बहिर्मुखपरिणतिविच्छेदादंतर्मुखप्रतिलोमपरिणामेन स्व तया
कारणे लयो योग इत्याख्यायते॥स च निरोधः सर्वासां चित्तस्य भूमीनां सर्वप्राणिनां धर्मः कदाचित्क
स्यांचिद्भूमावाविर्भवति॥ताश्च क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तस्य भूमयः॥चित्तस्यावस्था
विशेषा इत्यर्थः॥तत्र क्षिप्तं रजस उद्रेकादस्थिरं बहिर्मुखतया सुखदुःखादिविषयेषु व्यवहितेषु स विकल्पितेषु
न्निहितेषु वा रजसा प्रेरितं॥तच्च सदैव दैत्यदानवादीनां॥मूढं तमस उद्रेकात्कृत्याकृत्यविभागमग
णयन्क्रोधादिभिर्विरुद्धकृत्येष्वेव नियमितं॥तच्च सदैव रक्षःपिशाचादीनां॥विक्षिप्तं तु सत्त्वोद्रेकाद्वै
शिष्ट्येन परिहृत्य दुःखसाधनं सुखसाधनेष्वेव शब्दादिषु प्रवृत्तं॥तच्च सदैव देवतादीनां॥एतदुक्तं भ
वति॥रजसा प्रवृत्तिरूपं तमसा परापकारनिरतं॥सत्त्वेन सुखमयं चित्तं भवति॥एतास्तिस्रश्चित्ता
वस्था न समाधावुपयोगिन्यः॥एकाग्रनिरुद्धरूपे च सत्त्वोत्कर्षाद्यथोत्तरमवस्थितत्वात्समाधावुपयो
गं भजेते॥सत्त्वादिक्रमव्युत्क्रमे त्वयमभिप्रायः॥द्वयोरपि रजस्तमसोरत्यंतहेयत्वात्तदर्थं रजसः प्रथ
ममुपादानं॥यावन्न प्रवृत्तिर्दर्शिता तावन्निवृत्तिर्न शक्यते दर्शयितुमिति द्वयोर्व्यत्ययेन प्रदर्शनं॥

।।पा॰सू॰वृ॰।। सत्त्वस्यत्वेनदर्थंपश्चाद्दर्शनं।।यत्तस्योत्कर्षेणांतरेवैवमायोगोपयोगित्वाविति।।अनयोर्द्वयोरेकाग्र
।।२।। निरुद्धयोर्भूमिकयोर्यश्चित्तस्यैकाग्रतारूपःपरिणामःसयोगः।।किमुक्तंभवति।।एकाग्रेबहिर्वृत्ति
निरोधः।।निरोधेसर्वासांवृत्तीनांसंस्काराणांप्रविलयः।।इत्यनयोरेवभूम्योर्योगस्यसंभवः।। ।।इदा
नींसूत्रकारश्चित्तवृत्तिनिरोधपदानिव्याख्यातुकामःप्रथमंचित्तपदंव्याचष्टेसूत्रद्वयेनेतिशेषः।। ।।
तदाद्रष्टुःस्वरूपेवस्थानं।।३।। ।।द्रष्टुःपुरुषस्यतस्मिन्कालेस्वरूपेचिन्मात्ररूपतायामवस्थानंस्थिति
र्भवति।।अयमर्थः।।उत्पन्नविवेकख्यातेश्चित्तसंक्रमाभावात्कर्तृत्वाभिमाननिवृत्तौभोक्तृपरिण
मायोबुद्धावात्मनःस्वरूपेवस्थानंस्थितिर्भवति।।३।।व्युत्थानदशायांतस्यकिंरूपमित्यतआह।। ।।वृत्ति
सारूप्यमितरत्र।।४।। ।।इतरत्रयोगादन्यस्मिन्कालेवृत्तयोवक्ष्यमाणलक्षणास्ताभिःसारूप्यंतद्रूपत्वं।।
अयमर्थः।।यादृश्योवृत्तयःसुखदुःखमोहात्मिकाःप्रादुर्भवंति।।तादृग्रूपएवसंवेद्यतेव्यवहर्तृभिः
पुरुषः।।तदेवयस्मिन्नेकाग्रतयापरिणतेवस्तुनिचितिशक्तेःस्वस्मिन्रूपेप्रतिष्ठानंभवति।।यस्मिंश्चे
न्द्रियवृत्तिद्वारेणविषयाकारेणपरिणतेपुरुषस्तदाकारइवपरिभाव्यते।।यथाजलतरंगेषुचलत्सु
चंद्रश्चलन्निवप्रतिभासतेतद्वित्तं।।४।।वृत्तिपदंव्याख्यातुमाह।। ।।वृत्तयःपंचतय्यःक्लिष्टाअक्लि
ष्टाः।।५।। ।।वृत्तयश्चित्तस्यपरिणामविशेषाः।।वृत्तिसमुदायलक्षणस्यावयविनोऽवयवरूपतयावृ
त्तयस्तदपेक्षयातयप्प्रत्ययः।।तदुक्तंभवति।।पंचवृत्तयःकीदृश्यः।।क्लिष्टाः।।अक्लिष्टाः।।क्लेशैर्व ।।२।।

क्ष्यमाणैरारूढांताःक्लिष्टाः।।तद्विपरीताअक्लिष्टाः।।५।।ताएवपंचवृत्तयःसमुद्दिश्यव्याख्यायंते।। ।।
प्रमाणविपर्ययविकल्पनिद्रास्मृतयः।।६।। ।।आसांक्रमेणलक्षणमाह।। ।।प्रत्यक्षानुमानागमाःप्र
माणानि।।७।। ।।अत्रातिप्रसिद्धत्वात्प्रमाणानांशास्त्रकारेणभेदनिरूपणेनैवावगतत्वात्तल्लक्षणस्य
पृथग्लक्षणंनकृतं।।प्रमाणलक्षणंतु।।अविसंवादिज्ञानंप्रमाणमिति।।इंद्रियद्वारेणबाह्यवस्तूप
रागाच्चित्तस्यतद्विषयासामान्यविशेषात्मनोऽर्थस्यविशेषावधारणप्रधानावृत्तिःप्रत्यक्षं।।गृहीत
संबंधाल्लिंगाल्लिंगिनिसामान्यात्मनाध्यवसायोनुमानं।।आप्तवचनमागमः।।एवंप्रमाणरूपांवृत्तिं
ज्ञा व्याख्यायविपर्ययरूपामाह।। ।।विपर्ययोमिथ्याज्ञानमतद्रूपप्रतिष्ठं।।८।। ।।अतथाभूतेऽर्थेतथोत्पद्य
मानंज्ञानंविपर्ययः।।यथाशुक्तिकायांरजतज्ञानं।।अतद्रूपप्रतिष्ठमिति।।तस्यार्थस्ययद्रूपंनतस्मि
न्रूपेप्रतितिष्ठति।।तस्यार्थस्ययत्पारमार्थिकंरूपंनतत्प्रतिभासयतीतियावत्।।संशयोप्यतद्रू
पप्रतिष्ठत्वान्मिथ्याज्ञानं।।यथास्थाणुर्वापुरुषोवेति।।८।।विकल्पवृत्तिंव्याख्यातुमाह।। ।।शब्दज्ञा
नानुपातीवस्तुशून्योविकल्पः।।९।। ।।शब्दजनितंज्ञानंशब्दानुपतितुंशीलमस्यशब्दज्ञानानुपातीव स
स्तुनस्तथात्वमनपेक्षमाणोयोध्यवसायःसविकल्पइत्युच्यते।।यथापुरुषस्यचैतन्यंस्वरूपमि
ति।।अत्रदेवदत्तस्यकंबलइतिशब्दजनितेज्ञानेबुध्याषष्ठ्यायोध्यवसितोभेदस्तमिहाऽविद्यमान
मपिसमारोप्यप्रवर्ततेध्यवसायः।।वस्तुतस्तुचैतन्यमेवपुरुषः।।९।।निद्रांव्याख्यातुमाह।। ।।अ

४ छ्ज्ञानंनद

॥पा॰सू॰वृ॰॥ भावप्रत्ययालंबनावृत्तिर्निद्रा॥१०॥ ॥अभावप्रत्ययआलंबनंयस्याःवृत्तेःसातथोक्ता॥एतदुक्तंभवति॥
॥३॥ यासंततमुद्रिक्तत्वात्तमसःसमस्तविषयपरित्यागेनप्रवर्त्ततेवृत्तिःसानिद्रा॥अस्याश्चसुखमहमस्वा
प्समितिस्मृतिदर्शनात्स्मृतेश्चानुभवव्यतिरेकेणानुत्पत्तेर्वृत्तित्वं॥१०॥स्मृतिंव्याख्यातुमाह॥ ॥अनुभू
तविषयासंप्रमोषःस्मृतिः॥११॥ ॥प्रमाणेनानुभूतस्यविषयस्ययोयमसंप्रमोषःसंस्कारद्वारेणबुद्धावु प्र४
पारोहःसास्मृतिः॥तत्रप्रमाणविपर्ययविकल्पाजाग्रदवस्था॥तएवतदनुभवबलात्प्रत्यक्षाय
माणाःस्वप्नः॥निद्रात्वसंवेद्यमानविषया॥स्मृतिश्चप्रमाणविपर्ययविकल्पनिद्रानिमित्ता॥११॥
एवंवृत्तीर्व्याख्यायतासांनिरोधोपायंव्याख्यातुमाह॥ ॥अभ्यासवैराग्याभ्यांतन्निरोधः॥१२॥ ॥अभ्यास
वैराग्येवक्ष्यमाणलक्षणेताभ्यांप्रकाशप्रवृत्तिनियमरूपाणांचित्तवृत्तीनांयत्प्रतिदननेसनिरोधः॥
किमुक्तंभवति॥तासांनिवृत्तबाह्याभिनिवेशानामंतर्मुखतयास्वकारणएवचित्तेविच्छक्तिरूपत
यावस्थानं॥तत्रविषयदोषदर्शनजेनवैराग्येणतद्वैमुख्यमुत्पाद्यते॥अभ्यासेनचसुखजनकशां
तप्रत्ययप्रवाहप्रदर्शनद्वारेणदृढंस्थैर्यमुत्पाद्यते॥इत्थंताभ्यांभवतिचित्तवृत्तिनिरोधः॥अभ्या
संव्याख्यातुमाहस्त्ररूपेन॥ ॥तत्रस्थितौयत्नोभ्यासः॥१३॥ ॥वृत्तिरहितस्यचित्तस्यस्वरूपनिष्ठः
परिणामःस्थितिः॥तस्यांयत्नउत्साहः॥पुनःपुनस्तथात्वेनचेतसिनिवेशनमभ्यासइत्युच्यते॥१३॥
एतस्यैवविशेषमाह॥ ॥सतुदीर्घकालनैरंतर्यसत्कारासेवितोदृढभूमिः॥१४॥ ॥बहुकालंनैरं ॥३॥

रवृत्तिरादृत्येनेत्यर्थः।

तर्येणादरातिशयेनचसेव्यमानोदृढभूमिःस्थिरोभवति॥दार्ढ्यायभवतीत्यर्थः॥१४॥वैराग्यस्यलक्षणमाह स्प१
॥ ॥दृष्टानुश्रविकविषयवितृष्णस्यवशीकारसंज्ञावैराग्यं॥१५॥ ॥द्विविधोविषयः॥दृष्टआनुश्रविकश्च॥
दृष्टइहैवोपलभ्यमानःशब्दादिः॥देवलोकादावानुश्रविकः॥अनुश्रूयतेगुरुमुखादित्यनुश्रवोवेदः॥त
तआधिगतआनुश्रविकः॥तयोर्द्वयोरपिविषययोःपरिणामविरसत्वदर्शनाद्विगतगर्धस्ययावशी अनिकंपा
कारसंज्ञाममैतेवश्यानाहमेषांवश्यइतियोयंविमर्शस्तद्वैराग्यमुच्यते॥१५॥तस्यैवविशेषमाह॥॥
तत्परंपुरुषख्यातेर्गुणवैतृष्ण्यं॥१६॥ ॥तद्वैराग्यंपरमुत्कृष्टं॥प्रथमंवैराग्यंविषयविषयं॥द्विती
यंगुणविषयं॥उत्पन्नगुणपुरुषविवेकख्यातेरेवभवति॥निरोधसमाधेरत्यंतानुकूलत्वात्॥
१६॥एवंयोगस्यस्वरूपमुक्त्वासंप्रज्ञातासंप्रज्ञातस्वरूपंभेदमाह॥ ॥वितर्कविचारानंदास्मिता
नुगमात्संप्रज्ञातः॥१७॥ ॥समाधिरितिशेषः॥सम्यक्संशयविपर्ययरहितत्वेनप्रज्ञायतेप्रकर्षे
स्प णज्ञायतेभाव्यंस्वरूपंयेनससंप्रज्ञातःसमाधिर्भावनाविशेषः॥सवितर्कादिभेदाच्चतुर्विधः॥स
वितर्कः॥सविचारः॥सानंदः॥सास्मितश्च॥भावनानामभाव्यस्यविषयांतरपरित्यागेनचेतसिपु
नःपुनर्विनिवेशनं॥भाव्यंद्विविधं॥ईश्वरस्तत्वानिच॥तान्यपिचद्विधा॥जडाजडभेदात्॥जडानि
चतुर्विंशतिः॥अजडःपुरुषः॥तत्रयदामहाभूतेंद्रियाणिस्थूलानिविषयत्वेनादायपूर्वापरानु
संधानेनशब्दार्थोल्लेखभेदेनचयदाभावनाप्रवर्त्ततेतदासवितर्कसमाधिः॥अस्मिन्नेवावलंब

॥पा॰सू॰वृ॰॥ तेपूर्वापरानुसंधानशब्दार्थोल्लेखशून्यत्वेनयदाभावनाप्रवर्त्ततेतदानिर्वितर्कःसमा
॥४॥ धिः॥तन्मात्रांतःकरणलक्षणंसूक्ष्मंविषयमालंब्यतस्यदेशकालधर्मावच्छेदेनयदाभावनाप्रवर्त्त
तेतदासविचारः॥तस्मिन्नेवावलंबनेदेशकालधर्मावच्छेदंविनाधर्मिमात्रावभासित्वेनभावनाक्रि
यमाणानिर्विचारइत्युच्यते॥एवंपर्यंतःसमाधिर्ग्राह्यसमापत्तिरितिव्यपदिश्यते॥यदातुरजस्तमो
लेशानुविद्धमंतःकरणसत्त्वंभाव्यतेतदागुणभावाच्चिच्छक्तेःसुखप्रकाशमयस्यसत्त्वस्यभाव्य
मानस्योद्रेकात्सानंदसमाधिर्भवति॥अस्मिन्नेवसमाधौयेबद्धधृतयस्तत्त्वांतरंप्रधानपुरुषरू
पंनपश्यंतितेविगतदेहाहंकारत्वाद्विदेहशब्दवाच्याभवंति॥इयंग्रहणसमापत्तिः॥ततःपरंर
जस्तमोलेशानभिभूतंशुद्धंसत्त्वमालंबनीकृत्ययाप्रवर्त्ततेभावनातस्यांग्राह्यस्यसत्त्वस्यन्यग्भा ग्रहीणभावात्
वाच्चिच्छक्तेरुद्रेकात्सत्तामात्रावशेषत्वेनसमाधिःसास्मितइत्युच्यते॥नचाहंकारास्मितयोरभेदः
शंकनीयः॥यतोयत्रांतःकरणमहमित्युल्लेखेनविषयान्वेदयतेसोहंकारः॥यत्रांतर्मुखतयाप्र
तिलोमपरिणामेनप्रकृतिलीनेचेतसिसत्तामात्रमवभातिसास्मिता॥अस्मिन्नेवसमाधौयेकृ
तपरितोषाःपरंपरमात्मानंपुरुषंनपश्यंतितेषांचेतसिस्वकारणेलयमुपगतेप्रकृतिलया
इत्युच्यंते॥येपरंपुरुषंज्ञात्वाभावनायांप्रवर्त्तंतेतेषामियंविवेकख्यातिर्ग्रहीतसमापत्तिरित्यु
च्यते॥तत्रसवितर्कःसमाधौचतस्रोप्यवस्थाःशक्तिरूपतयावतिष्ठंते॥ततएकैकस्यास्त्यागउत्त ॥४॥

रोत्तरइतिचतुरवस्थोयंसंप्रज्ञातसमाधिः॥१७॥असंप्रज्ञातमाह॥॥विरामप्रत्ययाभ्यासपूर्वकःसंस्का
रशेषोन्यः॥१८॥ ॥विरम्यतेऽनेनेतिविरामः॥वितर्कादिचिंतात्यागः॥विरामश्चासौप्रत्ययश्चविराम
प्रत्ययस्तस्याभ्यासःपौनःपुन्येनचेतसिनिवेशनं॥तत्रयाकाचिद्वृत्तिरुल्लसतितस्यानेतिनेतीतिनैरं
तर्येणपर्युदसनंविरामप्रत्ययाभ्यासः॥तत्पूर्वकःसंप्रज्ञातसमाधिः॥संस्कारशेषोन्यः॥तद्विलक्ष
णोऽसंप्रज्ञातइत्यर्थः॥नतत्रकिंचिद्वेद्यंसंप्रज्ञायतइत्यसंप्रज्ञातोनिर्बीजःसमाधिः॥इहसमा
धौचतुर्विधश्चित्तस्यपरिणामः॥व्युत्थानं॥समाधिप्रारंभः॥एकाग्रता॥निरोधश्च॥तत्रक्षिप्तमूढे
चित्तवृत्तीव्युत्थानं॥विक्षिप्तभूमिःसत्त्वोद्रेकात्समाधिप्रारंभः॥एकाग्रतानिरुद्धपर्यंतभूमी॥प्रति पे
परिणामंचसंस्काराः॥तत्रव्युत्थानजनिताःसंस्काराःसमाधिप्रारंभजैःसंस्कारैर्हन्यंते॥तज्जाश्चैकाग्र
ताजैर्निरोधजनितैरेकाग्रताजाःसंस्काराःस्वरूपंचहन्यंते॥यथासुवर्णसंवलितंध्मायमानंसीस ग१०
कमात्मानंसुवर्णमलंचनिर्दहति॥एवमेकाग्रताजनितान्संस्कारान्निरोधजाताःस्वात्मानंचनि
र्दहंति॥१८॥तदेवंयोगस्यस्वरूपंभेदंचोपायंसंक्षेपेणाभिधायविस्तरेणोपायंयोगाभ्यासप्रदर्शन
पूर्वकंवक्तुमुपक्रमते॥॥भवप्रत्ययोविदेहप्रकृतिलयानां॥१९॥ ॥विदेहाःप्रकृतिलयाश्चेति
सवितर्कादिभूमिकास्तत्रैवव्याख्याताः॥तेषांसमाधिर्भवप्रत्ययः॥भवःसंसारःसएवप्रत्ययःका
रणंयस्यसभवप्रत्ययः॥अयमर्थः॥आविर्भूतमात्राएवतेसंसारेतथाविधसमाधिभाजोभवंति॥

॥पा॰सू॰वृ॰॥ तेषां परतत्त्वादर्शनाद्योगाभासोऽयं॥ अतः परतत्त्वज्ञाने तद्भावनायां च मुक्तिकामेन महान् यत्नो विधेय
॥५॥ इत्येतदर्थमुपदिष्टं॥१९॥ तदन्येषांतु॥ ॥श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषां॥ ॥इतरे
षां विदेहप्रकृतिलयव्यतिरिक्तानां योगिनां श्रद्धादिपूर्वकः श्रद्धादयः पूर्वे उपाया यस्य स श्रद्धा
दिपूर्वकः॥ ते च श्रद्धादयः क्रमादुपायोपेयभावेन प्रवर्त्तमानाः संप्रज्ञातस्य समाधेरुपायतां प्र
तिपद्यंते॥ तत्र श्रद्धा योगविषये चेतसः प्रसादः॥ वीर्यमुत्साहः॥ स्मृतिरनुभूतानामसंप्रमोषः॥
समाधिरेकाग्रता॥ प्रज्ञा ज्ञातव्यविवेकः॥ तत्र श्रद्धावतो वीर्यं जायते॥ योगविषये उत्साहवान्
भवति॥ सोत्साहस्य पाश्चात्यासु भूमिषु स्मृतिरुपजायते॥ तत्स्मरणाच्चेतः समाधीयते॥ समा
हितचित्तश्च भाव्यं सम्यक् विवेकेन जानाति॥ त एते संप्रज्ञातस्य समाधेरुपायाः॥ तदभ्यासात्परा
च्च वैराग्याद्भवत्यसंप्रज्ञातः॥२०॥ उक्तोपायवतां योगिनामुपायभेदाद्भेदानाह॥ ॥तीव्रसंवेगानामा
सन्नः समाधिः॥२१॥ ॥संवेगः क्रियाहेतुर्दृढतरः संस्कारः स तीव्रो येषामधिमात्रोपायानां तेषा
मासन्नः समाधिलाभः॥ समाधेः फलं चासन्नं भवति॥ शीघ्रमेव निष्पद्यत इत्यर्थः॥२१॥ के ते ती
तत्रा व्रसंवेगा इत्यत आह॥ ॥मृदुमध्याधिमात्रत्वात्ततोऽपि विशेषः॥२२॥ तेभ्य उपायेभ्यो मृद्वादिभेदभिन्नेभ्य
उपायवतां विशेषो भवति॥ मृदुर्मध्योधिमात्र इत्युपायभेदाः॥ ते प्रत्येकं मृदुसंवेगमध्यसंवेगती
व्रसंवेगभेदात्त्रिविधाः॥ तद्भेदेन नव योगिनो भवंति॥ मृदूपायो मृदुसंवेगो मध्यसंवेगस्तीव्रसंवे ॥५॥

गश्च॥ मध्योपायो मृदुसंवेगो मध्यसंवेगस्तीव्रसंवेगश्च॥ अधिमात्रोपायो मृदुसंवेगो मध्यसंवेगस्तीव्रसं
वेगश्च॥ अधिमात्रोपाये तीव्रसंवेगे च महान् यत्नः कर्त्तव्य इति भेदोपदेशः॥२२॥ इदानीमेतदुपायविल
क्षणं सुगममुपायांतरं दर्शयितुमाह॥ ॥ईश्वरप्रणिधानाद्वा॥२३॥ ॥ईश्वरो वक्ष्यमाणलक्षणः॥ प्रणिधा
नं तत्र भक्तिविशेषः विशिष्टमुपासनं सर्वक्रियाणामपि तत्रार्पणं विषयसुखादिकं फलमनिच्छन् सर्वाः
क्रियास्तस्मिन् परमगुरावर्पयति तत्प्रणिधानं समाधेस्तत्फललाभस्य च प्रकृष्ट उपायः॥ ईश्वरप्र
णिधानात्समाधिलाभ इत्युक्तं॥ तत्रेश्वरस्य स्वरूपं प्रमाणं प्रभावं वाचकमुपासनाक्रमं तत्फलं
च क्रमेण वक्तुमाह॥ ॥क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः॥२४॥ ॥क्लिश्यंत इ
ति क्लेशाः॥ अविद्यादयो वक्ष्यमाणाः॥ विहितप्रतिषिद्धव्यामिश्ररूपाणि कर्माणि वक्ष्यमाणानि॥ वि
पच्यंत इति विपाकाः कर्मफलानि जात्यायुर्भोगाः॥ आफलविपाकाच्चित्तभूमौ शेरत इत्याशया वा
सनाख्याः संस्कारास्तैरपरामृष्टस्त्रिष्वपि कालेषु न संस्पृष्टः पुरुषविशेषः॥ अन्येभ्यः पुरुषेभ्यो वि
शिष्यत इति विशेषः॥ स ईश्वरः ईशनशीलः॥ इच्छामात्रेणैव सकलजगदुद्धरणक्षमः॥ यद्यपि सर्वेषा
मात्मनां क्लेशादिस्पर्शो नास्ति॥ तथापि तच्चित्तगतस्तेषामुपदिश्यते॥ यथा योद्धृगतो जयपराजयो
स्वामिनः॥ अस्य तु त्रिष्वपि कालेषु तथाविधोऽपि क्लेशादिपरामर्शो नास्तीत्यतः सर्वविलक्षण एव भ
गवानीश्वरः॥ तस्य च तथाविधमैश्वर्यमनादेः सत्त्वोत्कर्षात्॥ सत्त्वोत्कर्षश्चास्य प्रकृष्टज्ञानादेव॥ न

नेनच

॥पा॰सू॰वृ॰॥ चतयोर्ज्ञानैश्वर्ययोरितरेतराश्रयत्वं॥परस्परानपेक्षत्वात्॥तेद्वेज्ञानैश्वर्येईश्वरसत्त्वेवर्त्तमानेऽना
॥६॥ दिभूते॥तथाविधेनसत्त्वेनतस्यानादिरेवसंबंधः॥प्रकृतिपुरुषसंयोगवियोगयोरीश्वरेच्छाव्यति
रेकेणानुपपत्तेः॥यथेतरेषांप्राणिनांसुखदुःखमोहतयापरिणतेचित्तेनिर्मलेसात्त्विकेधर्मात्मप्र ध
योगिचित्ते ख्येप्रतिसंक्रांतेचिच्छायासंक्रांतेसंवेद्यंभवति॥नैवमीश्वरस्य॥तस्यकेवलएवसात्त्विकःपरिणा
मःउत्कर्षवाननादिसंबंधेनभोग्यतयाव्यवस्थितः॥अतःपुरुषांतरविलक्षणतयासएवेश्वरः॥
मुक्तात्मनांपुनःक्लेशादियोगस्तैस्तैःशास्त्रोक्तैरुपायैर्निवर्तितः॥अस्यपुनःसर्वदैवतथाविधत्वा
न्नमुक्तात्मतुल्यत्वं॥नचेश्वराणामनेकत्वं॥तेषांतुल्यत्वेपिसतिभिन्नाभिप्रायत्वात्कार्यस्यैवानुपप
त्तेः॥उत्कर्षापकर्षयुक्तत्वेयएवोत्कृष्टःसएवेश्वरः॥तत्रैवकाष्ठाप्राप्तत्वादैश्वर्यस्य॥एवमीश्व
रस्यस्वरूपमभिधायप्रमाणमाह॥ ॥तत्रनिरतिशयंसर्वज्ञबीजं॥२५॥ ॥तस्मिन्भगवतिसर्वज्ञत्व
स्ययद्बीजमतीतानागतादिग्रहणस्याल्पत्वंमहत्त्वंचतन्मूलत्वाद्बीजमिवबीजं॥तत्तुतत्रनिरतिशयं
काष्ठाप्राप्तं॥दृष्टाह्यल्पत्वमहत्त्वादीनांधर्माणांसातिशयानांकाष्ठाप्राप्तिः॥यथापरमाणावल्पत्वस्याका
शेपरममहत्त्वस्य॥एवंज्ञानादयोपिचित्तधर्मास्तारतम्येनपरिदृश्यमानाःक्वचिन्निरतिशयतामा
पा सादयंति॥यत्रचैतेनिरतिशयाःसईश्वरः॥यद्यपिसामान्यमात्रेनुमानस्यपर्यवसितत्वान्नविशे ॥६॥
षावगतिःसंभवति॥तथापिशास्त्रादस्यसर्वज्ञत्वादयोविशेषाअवगंतव्याः॥सतुप्रयोजनाभावेकथं

प्रकृतिपुरुषयोःसंयोगवियोगावापादयतीतिनाशंकनीयं॥तस्यकारुणिकत्वाद्भूतानुग्रहएवप्रयोज
नं॥कल्पप्रलयमहाप्रलयेषुनिःशेषान्संसारिणउद्धरिष्यामीतितस्याध्यवसायः॥यद्यस्येष्टंतत्तस्य
प्रयोजनमिति॥२५॥एवमीश्वरस्यप्रमाणमभिधायप्रभावमाह॥ ॥सपूर्वेषामपिगुरुःकालेनान
वच्छेदात्॥२६॥ ॥आद्यानांस्रष्टॄणांब्रह्मादीनामपिसगुरुरुपदेष्टा॥यतःकालेननावच्छिद्यते॥अना प४
दित्वात्॥तेषांपुनरादिमत्त्वादस्तिकालेनावच्छेदसंबंधः॥एवंप्रभावमुक्त्वोपासनोपयोगायवाचक
माह॥ ॥तस्यवाचकःप्रणवः॥२७॥ ॥इत्थमुक्तस्वरूपस्येश्वरस्यवाचकोभिधायकःप्रणवॐकारः॥
भावलक्षणः तयोश्चवाच्यवाचकसंबंधोनित्यःसंकेतेनप्रकाश्यते॥नतुकेनचित्क्रियते॥यथापितापुत्रयोर्वि
पितास्यायं द्यमानएवसंबंधोस्यायंपुत्रइतिकेनचित्प्रकाश्यते॥२७॥उपासनमाह॥ ॥तज्जपस्तदर्थभाव
नं॥२८॥ ॥तस्यसार्द्धत्रिमात्रस्यप्रणवस्यजपोयथावदुच्चारणं॥तद्वाच्यस्येश्वरस्यभावनंपुनः
पुनश्चेतसिनिवेशनं॥एकाग्रतायाउपायः॥अतःसमाधिसिद्धयेयोगिनाप्रणवोजप्यस्तदर्थश्च
भावनीयइत्युक्तं॥२८॥उपासनायाःफलमाह॥ ॥ततःप्रत्यक्चेतनाधिगमोप्यंतरायाभावश्च॥२९॥
तस्मात्तज्जपात्तदर्थभावनाच्चयोगिनःप्रत्यक्चेतनाधिगमोभवति॥विषयप्रातिकूल्येनस्वांतःकरणा
भिमुखमंचतियाचेतनाद्दृक्शक्तिःसाप्रत्यक्चेतना॥तस्याअधिगमोज्ञानंभवति॥अंतरायाव
क्ष्यमाणलक्षणास्तेषामभावःशक्तिप्रतिबंधोभवति॥२९॥अथकेतेंतरायाइत्याशंकायामाह॥

॥यो॰सू॰वृ॰॥ ॥व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षे
॥७॥ पास्तेऽन्तरायाः॥३०॥ ॥नवैते रजस्तमोबलात्प्रवर्त्तमानाश्चित्तस्य विक्षेपा भवंति॥ तैरेकाग्रता विरो
धिनिश्चित्तं विक्षिप्यत इत्यर्थः॥ तत्र व्याधिर्धातुवैषम्यनिमित्तो ज्वरादिः॥ स्त्यानमकर्मण्यता चित्तस्य॥
५ विज्ञानं उभयकोट्यवलंबनं संशयः॥ योगः साध्यः स्याद्वा न वेति प्रमादोनुष्ठानशीलता॥ समाधिसाध
नेष्वौदासीन्यं॥ आलस्यं कायचित्तयोर्गुरुत्वं॥ योगविषये प्रवृत्त्यभावहेतुः॥ अविरतिश्चित्तस्य वि
षयसंयोगात्मा गर्द्धिः॥ भ्रांतिदर्शनं शुक्तिकायां रजतवद्विपर्ययज्ञानं॥ अलब्धभूमिकत्वं कुत
श्चिन्निमित्तात्समाधिभूमेरलाभः॥ असंप्राप्तिः॥ अनवस्थितत्वं लब्धायामपि समाधिभूमौ चित्त
स्य तत्राप्रतिष्ठता॥ त एते समाधेरेकाग्रताया यथायोगं प्रतिपक्षत्वादंतराया इत्युच्यंते॥३०॥ चि
त्तविक्षेपकारकानन्यानप्यंतरायान्प्रतिपादयितुमाह॥ ॥दुःखदौर्मनस्यांगमेजयत्वश्वास
प्रश्वासा विक्षेपसहभुवः॥३१॥ ॥कुतश्चिन्निमित्तादुत्पन्नेषु विक्षेपेषु एते दुःखादयः प्रवर्त्तंते॥
तत्र दुःखं चित्तस्य राजसः परिणामो बाधनालक्षणो यद्बाधात्प्राणिनस्तदुपघाताय प्रवर्त्तंते॥ दौ
र्मनस्यं बाह्यांतःकरणैर्मनसो दौःस्थ्यं॥ अंगमेजयत्वं सर्वांगीणो वेपथुः॥ आसनस्थैर्यस्य बाध
कः॥ प्राणो यद्बाह्यं वायुमाचामति स श्वासः॥ यत्कौष्ठ्यं वायुं निःश्वसिति स प्रश्वासः॥ त एते विक्षे
पैः सह वर्त्तमाना यथोदितेनाभ्यासवैराग्याभ्यां निरोद्धव्या इत्येतेषामुपदेशः॥३१॥ सोपद्र ॥७॥

वविक्षेपप्रतिषेधार्थमुपायांतरमाह॥ ॥तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः॥३२॥ ॥तेषां विक्षेपाणां निषे
कस्मिन् धार्थमेकस्मिंश्चिदभिमते तत्त्वेऽभ्यासश्चेतसः पुनः पुनर्निवेशनं कुर्यात्॥ यद्बलात्प्रत्युदितायामे
काग्रतायां विक्षेपाः प्रशममुपयांति॥३२॥ इदानीं चित्तसंस्कारापादकपरिकर्मकथनमुपायांतर
माह॥ ॥मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादं॥३३॥
मैत्री सौहार्दं॥ करुणा कृपा॥ मुदिता हर्षः॥ उपेक्षा औदासीन्यं॥ एता यथाक्रमं सुखितेषु दुःखितेषु
पुण्यवत्सु अपुण्यवत्सु च भावयेत्॥ तथा हि॥ सुखितेषु साध्वेषां सुखित्वमिति मैत्रीं कुर्यान्नेर्ष्यां॥ दुः वी
खितेषु कथं नु नामैषां दुःखमुक्तिः स्यादिति कृपामेव कुर्यान्न तटस्थ्यं॥ पुण्यवत्सु पुण्यानुमोदने
न हर्षं कुर्यान्न तु किमेते पुण्यवंत इति विद्वेषं॥ अपुण्यवत्सु चौदासीन्यमेव भावयेन्नानुमोदनं न वा
द्वेषं॥ इह सूत्रे सुखादिशब्दैस्तद्वंतः प्रतिपादिताः॥ तदेवं मैत्र्यादिपरिकर्मणा चित्तप्रसादे सति सुखे
न समाधेराविर्भावो भवति॥ परिकर्म चैतद्बाह्यं कर्म॥ यथा गणिते मिश्रकादिव्यवहारगणितनिष्प
त्तये संकलितादिकर्मोपकारकत्वेन प्रधानकर्मनिष्पत्तये भवति॥ एवं रागद्वेषादिप्रतिपक्षभू
तमैत्र्यादिभावनया समुत्पादितप्रसादे चित्ते संप्रज्ञातादिसमाधियोग्यं संपद्यते॥ रागद्वेषावेव मु
ख्यतया विक्षेपमुत्पादयतः॥ तौ चेत्समूलमुन्मूलितौ तदा प्रसन्नत्वान्मनसो भवत्येवैकाग्रता॥३३॥ उपा
यांतरमाह॥ ॥प्रच्छर्दनविधारणाभ्यां वा प्राणस्य॥३४॥ प्रच्छर्दनं यत्कौष्ठ्यस्य वायोः प्रयत्नविशेषान्मा
रस्यातं

१विधारणं

॥पा०सू०वृ०॥ ॥८॥ त्राप्रमाणेनबहिर्निःसारणं॥मात्राप्रमाणेनैवप्राणस्यायामोबहिर्गतिविच्छेदः विधारणं॥सचद्वा
भ्यांप्रकाराभ्यांबाह्याभ्यंतरपूरणेनपूरितस्यवायोस्तत्रैवनिरोधनं॥तदेवंरेचककुंभकपूरकभेदे
नत्रिविधःप्राणायामश्चित्तस्यस्थितिमेकाग्रतांनिबध्नाति॥सर्वासामिंद्रियवृत्तीनांप्राणवृत्तिपूर्वकत्वा
न्मनःप्राणयोश्चस्वव्यापारेपरस्परमेकयोगक्षेमत्वाज्जीयमानःप्राणःसमस्तेंद्रियवृत्तिनिरोधद्वारेणचि
त्तस्यैकाग्रतायांप्रभवति॥समस्तदोषक्षयकारित्वंचास्यागमेश्रूयते॥दोषकृताश्चसर्वाविक्षेपवृत्त धि
यः॥अतोदोषनिवर्हणद्वारेणाप्यस्यैकाग्रतायांसामर्थ्यं॥३४॥इदानीमुपायांतरप्रदर्शनोपक्षेपेणसं
प्रज्ञातस्यसमाधेःपूर्वांगंकरोति॥ ॥विषयवतीवाप्रवृत्तिरुत्पन्नास्थितिनिबंधनी॥३५॥ ॥मन
सइतिवाक्यशेषः॥विषयागंधरसरूपस्पर्शशब्दास्तेविद्यंतेफलत्वेनयस्याःसाविषयवतीप्र
वृत्तिर्मनसःस्थैर्यंकरोति॥तथाहि॥नासाग्रेचित्तंधारयतोदिव्यगंधसंविदुपजायते॥तादृश्येवजि
ह्वाग्रेरससंवित्॥जिह्वामूलेचशब्दसंवेदनं॥तालुमूलेरूपसंवित्॥जिह्वामध्येस्पर्शसंवित्॥त
देवंतत्तदिंद्रियद्वारेणतस्मिंस्तस्मिन्दिव्येविषयेजायमानासंविच्चित्तस्यैकाग्रतायाहेतुर्भवति॥
अस्तियोगस्यफलमितियोगिनःसमाश्वासोत्पादनात्॥३५॥एवंविधमेवोपायांतरमाह॥ ॥वि
शोकावाज्योतिष्मती॥३६॥ ॥प्रवृत्तिरुत्पन्नाचित्तस्यस्थितिनिबंधनीतिवाक्यशेषः॥ज्योतिःशब्दे
नसात्विकःप्रकाशउच्यते॥सप्रशस्तोभूयान्विशेषवांश्चयस्याःसाज्योतिष्मतीप्रवृत्तिः॥विशो ॥८॥

कं विगतःसुखमयसत्वाभ्यासवशान्शोकोरजःपरिणामरूपोयस्याःसाविशोकासाचेतसःस्थि
तिनिबंधनी॥अयमर्थः॥हृत्पद्मसंपुटमध्येप्रशांतकल्लोलक्षीरोदधिप्रख्यंचित्तसत्वंभावयतःप्र
ज्ञालोकात्सर्ववृत्तिपरिक्षयेचेतसःस्थैर्यमुत्पद्यते॥३६॥उपायांतरप्रदर्शनद्वारेणसंप्रज्ञातस्यस
माधेर्विषयंदर्शयति॥ ॥वीतरागविषयंवाचित्तं॥३७॥मनसःस्थितिनिबंधनंभवतीतिवाशेषः॥वी क्य
तरागःपरित्यक्तविषयाभिलाषस्तस्ययच्चित्तंपरिहृतक्लेशंतदालंबनीकृतंचेतसःस्थितिहेतुर्भ
वति॥३७॥एवंविधमेवोपायांतरमाह॥ ॥स्वप्ननिद्राज्ञानालंबनंवा॥३८॥ ॥प्रत्यस्तमितबाह्येंद्रि
यवृत्तेर्मनोमात्रेणैवयत्रभोक्तृत्वमात्मनःसस्वप्नः॥निद्रापूर्वोक्तलक्षणा॥तदालंबनंस्वप्नालंबनं
निद्रालंबनंवाज्ञानमालंब्यमानंचेतसःस्थितिंकरोति॥३८॥नानारुचित्वात्प्राणिनांयस्मिन्कस्मिं
श्चिदभिमतेवस्तुनियोगिनःश्रद्धाभवतितस्यध्यानेनापिभवतीष्टसिद्धिरितिप्रतिपादयितुमाह॥
यथाभिमतध्यानाद्वा॥३९॥ ॥यथाभिप्रेतवस्तुनिबाह्येचंद्रादावभ्यंतरेनाडीचक्रादौवाभाव्यमाने
चेतःस्थिरीभवति॥३९॥एवमुपायान्प्रदर्श्यफलप्रदर्शनार्थमाह॥ ॥परमाणुपरममहत्वांतो
ऽस्यवशीकारः॥४०॥ ॥एभिरुपायैश्चित्तस्यस्थैर्यंभावयतोयोगिनःसूक्ष्मविषयेभावनाद्वारेणपर
माण्वंतोवशीकारोऽप्रतिघातरूपोजायते॥नक्वचित्परमाणुपर्यंतेसूक्ष्मविषयेऽस्यमनोनप्रतिह
न्यतइत्यर्थः॥एवंस्थूलमाकाशादिपरममहत्वपर्यंतंभावयतोनक्वचिच्चेतसःप्रतिघातउत्पद्य

१ क्षीणवृत्तयो यस्य तत् क्षीणवृत्ति तस्य ग्रहीतृग्रहणग्राह्येषु आत्मेन्द्रियविषयेषु तत्स्थतदंजनता समापत्तिर्भवति॥

॥पा·सू·वृ॥ ते॥ सर्वत्र ध्यानं स्यं भवतीत्यर्थः॥ एवमभिरुपायैः संस्कृतस्य चेतसः कीदृक् रूपं भवतीत्याह॥ ॥क्षी त॰
॥९॥ णवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदंजनता समापत्तिः॥४१॥ ॥तत्स्थत्वं तत्रैवै
श्चितस्य काग्रता॥ तदंजनता तन्मयत्वं॥ न्यग्भूतचित्ते विषयस्य भाव्यमानस्यैवोत्कर्ष स्तथाविधसमाप
प३ त्तिस्तद्रूपपरिणामो भवतीत्यर्थः॥ दृष्टांतमाह॥ अभिजातस्येव मणेः॥ यथाभिजातस्य निर्मलस्य
स्फटिकमणेस्तत्तदुपाश्रयवशात्तत्तद्रूपतापत्तिः॥ एवं निर्मलस्य चित्तस्य तत्तद्भावनीयवस्तूपरा स्य
गात्तत्तद्रूपतापत्तिः॥ यद्यपि ग्रहीतृग्रहणग्राह्येष्विति उक्तं तथापि भूमिकाक्रमवशात् ग्राह्यग्रहण
ग्रहीतृष्विति बोद्धव्यं॥ यतः प्रथमं ग्राह्यनिष्ठ एव समाधिः॥ ततो ग्रहणनिष्ठः॥ ततोऽस्मितामात्र
रूपो ग्रहीतृनिष्ठः॥ केवलस्य पुरुषस्य ग्रहीतुर्भाव्यत्वासंभवात्॥ ततश्च स्थूलसूक्ष्मग्राह्योपरक्तं
चित्तं तत्र समापन्नं भवति॥ एवं ग्रहणग्रहीतरि च समापन्नं बोद्धव्यं॥४१॥ इदानीमुक्ताया एव स
मापत्तेश्चातुर्विध्यं भेदमाह॥ ॥शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का॥४२॥ ॥श्रोत्रेंद्रियग्राह्यः
स्फोटरूपो वा शब्दः॥ अर्थो जात्यादिः॥ ज्ञानं सत्त्वप्रधाना बुद्धिवृत्तिः॥ विकल्प उक्तलक्षणः॥ एतैः
संकीर्णा यस्यामेते शब्दादयः परस्पराध्यासेन प्रतिभासंते॥ गौरिति शब्दो गौरित्यर्थो गौरिति
ज्ञानमि त्यनेनाकारेण या सा सवितर्का समापत्तिरित्युच्यते॥४२॥ उक्तलक्षणविपरीतां निर्वि
तर्कामाह॥ ॥स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का॥ ॥शब्दार्थस्मृति ॥९॥

४३

१ तन्मात्रेंद्रियादिरूपः

प्रविलये प्रत्युदितस्पष्टग्राह्याकारप्रतिभासितया न्यग्भूतज्ञानांशत्वेन स्वरूपशून्येव निर्वितर्का स
मापत्तिः॥४३॥ भेदांतरं प्रतिपादयितुमाह॥ ॥एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता॥४४॥
एतयैव सवितर्कया निर्वितर्कया च समापत्त्या सविचारा निर्विचारा च व्याख्याता॥ कीदृशी सूक्ष्म
विषया॥ सूक्ष्मस्तन्मात्रेंद्रियादिरूपो विषयो यस्याः सा तथोक्ता॥ एतेन पूर्वस्याः स्थूलविषयत्वं प्र
तिपादितं भवति॥ सा हि महाभूतेंद्रियालंबना शब्दार्थज्ञानविकल्पसहितत्वेन देशकालाद्यवच्छि
न्नः सूक्ष्मोऽर्थः प्रतिभाति यस्यां सा सविचारा॥ देशकालधर्मादिरहितो धर्मिमात्रतया सूक्ष्मोऽर्थः प्र
तिभाति यस्यां सा निर्विचारा॥ अस्या एव सूक्ष्मविषयायाः किंपर्यंतः सूक्ष्मो विषय इत्याह॥ ॥सूक्ष्म
विषयत्वं चालिंगपर्यवसानं॥४५॥ ॥सविचारनिर्विचारयोः समापत्त्योर्यत्सूक्ष्मविषयत्वमुक्तं
तदलिंगपर्यवसानं॥ न क्वचिल्लीयते न वा किंचिल्लिंगति गमयतीत्यलिंगं प्रधानं॥ तत्पर्यंतं
सूक्ष्मविषयत्वं॥ तथाहि॥ गुणानां परिणामे चत्वारि पर्वाणि॥ विशिष्टलिंगमविशिष्टलिंगं लिंग
मात्रमलिंगं चेति॥ विशिष्टलिंगं भूतानि॥ अविशिष्टलिंगं तन्मात्रेंद्रियाणि॥ लिंगमात्रं बुद्धिः॥ अ
लिंगं प्रधानमिति॥ नातः परं सूक्ष्ममस्तीत्युक्तं भवति॥४५॥ एतासां समापत्तीनां प्रकृते प्रयो
जनमाह॥ ॥ता एव सबीजः समाधिः॥४६॥ ॥ता एवोक्तलक्षणाः समापत्तयः सबीजः सह बीजे
न आलंबनेन वर्तत इति सबीजः संप्रज्ञातसमाधिरित्युच्यते॥ सर्वासां सालंबनत्वात्॥४६॥

॥पा॰सू॰वृ॰॥ ॥१०॥ अथेतरासां समापत्तीनां निर्विचारफलत्वान्निर्विचारायाः फलमाह॥ ॥निर्विचारवैशारद्येध्या
त्मप्रसादः॥४७॥ ॥निर्विचारत्वं व्याख्यातं॥ वैशारद्यं नैर्मल्यं॥ सवितर्कां स्थूलविषयामपेक्ष्य
निर्वितर्कायाः प्राधान्यं॥ ततोपि सूक्ष्मविषयायाः सविचारायास्ततोपि निर्विकल्परूपाया नि
र्विचारायाः प्रकृष्टाभ्यासवशाद्वैशारद्ये नैर्मल्ये सत्यध्यात्मप्रसादः समुपजायते॥ चित्तं क्लेश
वासनारहितं स्थितिप्रवाहयोग्यं भवति॥ एतदेव चित्तस्य वैशारद्यं यत्स्थितौ दार्ढ्यं॥४७॥ त
स्मिन्सति किं भवतीत्याह॥ ॥ऋतंभरा तत्र प्रज्ञा॥४८॥ ॥ऋतं सत्यं बिभर्ति कदाचिदपि न वि
पर्ययेणाच्छाद्यते सा ऋतंभरा प्रज्ञा तस्मिन्सति भवतीत्यर्थः॥ तस्माच्च प्रज्ञालोकात्सर्वं यथा
योगी वस्थितं पश्यन्प्रकृष्टं योगं प्राप्नोति॥४८॥ अस्याः प्रज्ञान्तराद्वैलक्षण्यमाह॥ ॥श्रुतानुमानप्रज्ञा
भ्यामन्यविषया विशेषार्थत्वात्॥४९॥ ॥श्रुतमागमज्ञानमनुमानमुक्तलक्षणं ताभ्यां या जा
यते प्रज्ञा सा सामान्यविषया॥ न हि शब्दलिंगयोरिंद्रियवद्विशेषप्रतिपत्तौ सामर्थ्यं॥ इयं तु पुनर्नि
र्विचारवैशारद्यसमुद्भवा प्रज्ञा॥ ताभ्यां विलक्षणा॥ विशेषविषयत्वात्॥ अस्यां हि प्रज्ञायां सू
ना क्ष्मव्यवहितविप्रकृष्टोपि विशेषः स्फुटेनैव रूपेण प्रतिभासते तस्मात्तस्यामेव योगिना परः प्र
यत्नः कार्य इत्युपदिष्टं भवति॥४९॥ अस्याः प्रज्ञायाः फलमाह॥ ॥तज्जः संस्कारोन्यसंस्कारप्र
तिबंधी॥५०॥ तया प्रज्ञया जनितो यः संस्कारः सोन्यान्संस्कारान्व्युत्थानजान्समाधिजांश्च सं ॥१०॥

स्कारान्प्रतिबध्नाति॥ स्वकार्यकरणाक्षमान्करोतीत्यर्थः॥ यतस्तत्त्वरूपतयानया जनिताः संस्का त
रा बलवत्त्वादतत्त्वरूपप्रज्ञाजनितान्संस्कारान्बाधितुं शक्नुवंति॥ अतस्तामेव प्रज्ञामभ्यसेदि
त्युक्तं भवति॥५०॥ एवं संप्रज्ञातसमाधिमभिधायासंप्रज्ञातं वक्तुमुपक्रमते॥ ॥तस्यापि निरो
धे सर्वनिरोधान्निर्बीजः समाधिः॥५१॥ ॥तस्य संप्रज्ञातस्य निरोधे प्रविलये सति सर्वासां पि
संस्कार चित्तवृत्तीनां स्वकारणे प्रविलयाद्यायाँमात्राद्वृत्तिरुदेति तस्यां तस्यां नेति नेति केवलं पर्युदसनान्नि
र्बीजः समाधिराविर्भवति॥ यस्मिन्सति पुरुषः स्वरूपमात्रनिष्ठः शुद्धो भवति॥ तदत्राधिकृत
स्य योगस्य लक्षणं चित्तवृत्तिनिरोधपदानां व्याख्यानं॥ अभ्यासवैराग्यलक्षणस्योपायद्वयस्य स्व
रूपं भेदं चाभिधाय संप्रज्ञातासंप्रज्ञातभेदेन योगस्य भेदमुक्त्वा योगाभ्यासप्रदर्शनपूर्वकान्वि मुख्य
स्तरेणोपायान्प्रदर्श्य सुगमोपायप्रदर्शनपरतया ईश्वरस्य स्वरूपप्रमाणप्रभाववाचकोपा
सनाक्रमतत्फलानि निर्णीय चित्तविक्षेपांस्तत्सहभुवश्च दुःखादीन्विस्तरेण तत्प्रतिषेधो
पायानेकतत्त्वाभ्यासमैत्र्यादिप्राणायामादीनि संप्रज्ञातपूर्वरंगभूतविषयवतीप्रवृत्तिरित्या
दीनाख्यायोपसंहारद्वारेण च समापत्तीः सलक्षणाः फलसहिताः स्वस्वविषयसहिताश्चोक्त्वा
संप्रज्ञातासंप्रज्ञातयोरुपसंहारमभिधाय सबीजपूर्वको निर्बीजः समाधिरभिहित इति व्या
कृतो योगपादः॥ १॥ ॥इति श्रीमहाराजाधिराजश्रीभोजदेवविरचितायां पातंजलयोगशा

समाप्तो योगपादः प्रथमः॥ ॥१॥ ॥छ॥ ॥तेन दुःखापयोगर्द्धिसिद्धये येन दर्शिताः॥ उपा
याः स जगन्नाथस्त्र्यक्षोस्तु प्रार्थिताप्तये॥१॥ तदेवं प्रथमपादे समाहितचित्तस्य सोपायं योगमभिधाय
व्युत्थितचित्तस्यापि कथमुपायाभ्यासपूर्वको योगः साध्यतामुपयास्यतीति तत्साधनानुष्ठानप्रति
पादनाय क्रियायोगमाह॥ ॥तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः॥१॥ ॥तपः शास्त्रान्त
रोपदिष्टं कृच्छ्रचांद्रायणादि॥ स्वाध्यायः प्रणवपूर्वाणां मंत्राणां जपः॥ मोक्षशास्त्राध्ययनं वा॥ ईश्वर
प्रणिधानं सर्वक्रियाणां तस्मिन् परमगुरौ फलनिरपेक्षतया समर्पणं॥ एतानि क्रियायोग इत्यु
च्यते॥१॥ स किमर्थमित्याह॥ ॥समाधिभावनार्थः क्लेशतनूकरणार्थश्च॥२॥ ॥क्लेशा वक्ष्यमा
णास्तेषां तनूकरणं स्वकार्यकरणप्रतिबंधः॥ समाधिरुक्तलक्षणः॥ तस्य भावना चेतसि पुनः
पुनर्निवेशनं॥ सोर्थः प्रयोजनं यस्य स तथोक्तः॥ एतदुक्तं भवति॥ एते तपःप्रभृतयोभ्यस्यमानाः
चित्तगतानविद्यादीन् क्लेशान् शिथिलीकुर्वंतः समाधेरुपकारितां भजंते॥ तस्मात्प्रथमं क्रि
यायोगपरेण योगिना भवितव्यमित्युपदिष्टं भवति॥२॥ क्लेशतनूकरणार्थ इत्युक्तं तत्र के क्लेशा
इत्याह॥ ॥अविद्यास्मितारागद्वेषाभिनिवेशाः पंच क्लेशाः॥३॥ ॥अविद्यादयो वक्ष्यमाणलक्ष
णाः पंचैते बाधनालक्षणं परितापमुपजनयंतः क्लेशशब्दवाच्या भवंति॥ ते हि चेतसि प्रवर्त्त
मानाः संसारलक्षणं गुणपरिणामं दृढयंति॥ सत्यपि सर्वेषां तुल्ये क्लेशत्वे मूलभूतत्वाद ॥११॥

२

विद्यायाः प्राधान्यं प्रतिपादयितुमाह॥ ॥अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणां॥४॥ ॥अ
विद्या मोहः॥ अनात्मन्यात्माभिमान इति यावत्॥ क्षेत्रं प्रसवभूमिः॥ उत्तरेषामस्मितादीनां प्रत्येकं प्र
सुप्ताद्भेदेन चतुर्विधानां॥ अतो यत्राविद्या विपर्ययज्ञानरूपा शिथिलीभवति तत्र क्लेशानां रागा
दीनां नोद्भवो दृश्यते॥ विपर्ययज्ञानसद्भावे च तेषामुद्भवदर्शनात् स्थितमेव मूलत्वमविद्यायाः॥
प्रसुप्ततनुविच्छिन्नोदाराणामिति॥ तत्र ये क्लेशाश्चित्तभूमौ स्थिता अपि प्रबोधकाभावे स्वकार्यं ना
रभंते ते प्रसुप्ता इत्युच्यंते॥ यथा बालावस्थायां॥ बालस्य हि वासनारूपेण स्थिता अपि क्लेशाः
प्रबोधकसहकार्यभावेनाभिव्यज्यंते॥ ते तनवो ये स्वस्वप्रतिपक्षभावनया शिथिलीकृतकार्यसं
पादनशक्तयो वासनाविशेषतया चेतस्यवस्थिताः प्रभूतां सामग्रीमंतरेण न स्वकार्यमारब्धुं क्ष
माः॥ यथाभ्यासवतो योगिनः॥ ते विच्छिन्ना ये केनचिद्बलवता क्लेशेनाभिभूतशक्तयस्तिष्ठंति॥ य
था द्वेषावस्थायां रागो रागावस्थायां द्वेषः॥ न ह्यनयोः परस्परविरुद्धयोर्युगपत्संभवोस्ति॥ ते उ
दारा ये प्राप्तसहकारिसंनिधयः स्वं स्वं कार्यमभिनिर्वर्त्तयंति॥ यथा सर्वदैव योगप्रतिपंथिनो व्यु
त्थानोत्पादनदशायां॥ एषां प्रत्येकं चतुर्विधानामपि मूलभूतत्वेन स्थिता ऽविद्या ऽन्वयत्वेन प्र
तीयते॥ न हि कश्चिदपि क्लेशानां विपर्यासान्वयनिरपेक्षाणां रूपाण्युपलभ्यंते॥ तस्यां च मिथ्या
ज्ञानरूपायां सम्यग्ज्ञानेन निवर्त्तितायां दग्धबीजकल्पानामेषां न क्वचित्संप्ररोहोस्तीत्यविद्या

निमित्तत्वमविद्यान्वयश्चैतेषां निश्चीयते॥अतः सर्वेष्वविद्याव्यपदेशभाजः॥सर्वेषांच क्लेशानांचि
त्तविक्षेपकारित्वाद्योगिना प्रथममेव तदुच्छेदे यत्नः कर्त्तव्य इति॥४॥अविद्याया लक्षणमाह॥ ॥अ
नित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या॥५॥ ॥अतस्मिंस्तत्प्रतिभासोऽविद्ये
त्यविद्यायाः सामान्यलक्षणं॥तस्या एव भेदप्रतिपादनं॥अनित्येषु घटादिषु नित्यत्वाभिमानोऽवि
द्येत्युच्यते॥एवमशुचिषु कायादिष्वशुचित्वाभिमानः॥दुःखेषु च विषयेषु सुखाभिमानः॥अना
त्मनि शरीरे आत्माभिमानः॥एतेनापुण्ये पुण्यभ्रमोऽनर्थे चार्थभ्रमो व्याख्यातः॥५॥अस्मि
तालक्षणमाह॥ ॥दृग्दर्शनशक्त्योरेकात्मतेवास्मिता॥६॥ ॥दृक्शक्तिः पुरुषः॥दर्शनशक्तिः रज
स्तमोभ्यामनभिभूतः सात्त्विकः परिणामोऽन्तःकरणरूपः॥तयोर्भोग्यभोक्तृत्वेन जडाजडत्वेन चात्यं
तभिन्नरूपयोरेकताभिमानोऽस्मितेत्युच्यते॥यथा प्रकृतिवस्तुनः कर्तृत्वभोक्तृत्वरहितापि क
र्त्री भोक्त्र्यहमित्यभिमन्यते॥सोयमस्मिताख्यो विपर्यासः क्लेशः॥६॥रागस्य लक्षणमाह॥ ॥सुखा
नुशयी रागः॥७॥ ॥सुखमनुशेत इति सुखानुशयः॥सुखज्ञस्य सुखानुस्मृतिपूर्वकः सुखसाध
नेषु तृष्णारूपो गर्द्धो रागसंज्ञकः क्लेशः॥७॥द्वेषस्य लक्षणमाह॥ ॥दुःखानुशयी द्वेषः॥८॥दुःख
मुक्तलक्षणं॥तदभिज्ञस्य तदनुस्मृतिपूर्वकं तत्साधनेष्वनभिरतिलक्षणा येयं निंदा स द्वेषलक्षणः क्ले
शः॥८॥अभिनिवेशमाह॥ ॥स्वरसवाही विदुषोपि तथारूढोऽभिनिवेशः॥९॥ ॥पूर्वजन्मानुभू

तमरणदुःखानुभववासनाबलाद्भयरूपः समुपजायमानः शरीरविषयादिभिर्मम वियोगो
मा भूदित्यन्वहमनुबंधरूपः सर्वस्यैवाकृमेर्ब्रह्मपर्यंतं निमित्तं विना प्रवर्त्तमानोऽभिनिवेशाख्यः
न क्लेशः॥तदेवं स्थूलस्य क्लेशात्मकत्वादेकाग्रताभ्यासकामेन प्रथमं क्लेशाः परिहर्त्तव्याः॥९॥न चाज्ञा
तानां तेषां परिहारः शक्यः कर्तुमिति तज्ज्ञानाय तेषामुद्देशं क्षेत्रं विभागं लक्षणं चाभिधाय स्थूल
सूक्ष्मभेदभिन्नानां तेषां प्रहाणोपायविभागमाह॥ ॥ते प्रतिप्रसवहेयाः सूक्ष्माः॥१०॥ते सूक्ष्माः
क्लेशा ये वासनारूपेणावस्थिता न वृत्तिरूपं परिणाममारभंते॥ते प्रतिप्रसवेन प्रतिलोमपरि
णामेन हेयास्त्यक्तव्याः॥स्वकारणेऽस्मितायां कृतार्थं सवासनं चित्तं यदा प्रविष्टं भवति तदा कुतस्ते
षां निर्मूलानां संभवः॥१०॥स्थूलानां हानोपायमाह॥ ॥ध्यानहेयास्तद्वृत्तयः॥११॥तेषां क्लेशाना
मारब्धकार्याणां सुखदुःखमोहात्मिका वृत्तयस्ता ध्यानेन चित्तस्यैकाग्रतालक्षणेन हेया हात
व्या इत्यर्थः॥चित्तपरिकर्माभ्यासमात्रेणैव स्थूलत्वात्तासां निवृत्तिर्भवति॥यथा वस्त्रादौ स्थूलो म
लः प्रक्षालनमात्रेण निवर्त्तते॥यस्तु तत्र सूक्ष्मः स तैस्तैरुपायैरुत्तापनप्रभृतिभिरेव निवर्त्तयि
तुं शक्यते॥११॥एवं क्लेशानां तत्त्वमभिधाय कर्माशयस्याभिधानमाह॥ ॥क्लेशमूलः कर्माशयो
दृष्टादृष्टजन्मवेदनीयः॥१२॥कर्माशय इत्यनेन तस्य स्वरूपमभिहितं॥यतो वासनारूपाण्ये
व कर्माणि॥क्लेशमूल इत्यनेन कारणमभिहितं॥यतः कर्मणां शुभाशुभानां क्लेशा एव निमित्तं॥

॥पा॰सू॰वृ॰॥ दृष्टादृष्टजन्मवेदनीयस्तनेन फलमुक्तं॥ अस्मिन्नेव जन्मन्यनुभववेदनीयो दृष्टजन्मवेदनीय इ
॥१३॥ ति॥ जन्मांतरानुभवनीयोऽदृष्टजन्मवेदनीयः॥ तथाहि॥ कानिचित्पुण्यानि कर्माणि देवताराध
नादीनि तीव्रसंवेगेन कृतानीहैव जन्मनि फलं जात्यायुर्भोगलक्षणं प्रयच्छंति॥ यथा नंदीश्वर
स्य भगवन्महेश्वराराधनबलादिहैव जन्मनि जात्यायुर्भोगा विशिष्टाः प्रादुर्भूताः॥ एवमन्ये
षां विश्वामित्रादीनां तपःप्रभावाज्जात्यायुषी॥ केषांचिज्जातिरेव॥ यथा तीव्रसंवेगेन दुष्टकर्मकृ
तां नहुषादीनां जात्यंतरादिपरिणामः॥ उर्वश्याश्च कार्त्तिकेयवने लतारूपतया॥ एवं व्यस्तसम
स्तत्वेन यथायोगं योज्यं॥१२॥ इदानीं कर्माशयस्य स्वभेदभिन्नं फलमाह॥ ॥सति मूले तद्विपाको
जात्यायुर्भोगाः॥१३॥ ॥उक्ताः स्वलक्षणाः क्लेशास्तेषु मूलभूतेषु सत्सु कर्मणां कुशलाकु
शलरूपाणां विपाकः फलं जात्यायुर्भोगा भवंति॥ जातिर्मनुष्यत्वादिः॥ आयुश्चिरकालं शरीरसं
बंधः॥ भोगा विषयाः॥ इंद्रियाणि सुखदुःखसंविच्च॥ कर्मकरणभावसाधनव्युत्पत्त्या भोगश
ब्देनैव वाच्यत्वात्॥ इदमत्र तात्पर्यं॥ चित्तभूमावनादिकालसंचिताः कर्मवासना यथा यथा पा
कमुपयांति तथा तथा गुणप्रधानभावेन स्थिता जात्यायुर्भोगलक्षणं कार्यमारभंते॥१३॥ उक्ता
नां कर्मफलत्वेन जात्यादीनां स्वकारणकर्मानुसारेण कार्यकर्तृत्वमाह॥ ॥ते ह्लादपरितापफलाः
पुण्यापुण्यहेतुत्वात्॥१४॥ ॥ह्लादः सुखं॥ परितापो दुःखं॥ ह्लादपरितापौ फलं येषां ते तथोक्ताः॥ ॥१३॥

पुण्यं कुशलं कर्म॥ तद्विपरीतमपुण्यं॥ ते पुण्यापुण्ये कारणं येषां तेषां भावस्तस्मात्॥ एतदुक्तं भवति॥
पुण्यकर्मारब्धा जात्यायुर्भोगा ह्लादफलाः॥ अपुण्यकर्मारब्धाः परितापफलाः॥ एतच्च प्राणिमात्रा
पेक्षया द्वैविध्यं॥१४॥ योगिनस्तु सर्वं दुःखमित्याह॥ ॥परिणामपरितापसंस्कारदुःखैर्गुणवृत्ति
विरोधाच्च दुःखमेव सर्वं विवेकिनः॥१५॥ ॥परिज्ञातक्लेशादिविवेकस्य दृश्यमानं सकलमेव
ध भोगसाधनं सविषत्वादन्नवद्दुःखमेव प्रतिकूलवेदनीयमेवेत्यर्थः॥ यस्मादत्यंताभिजातो योगी
दुःखलेशेनाप्युद्विजते॥ यथाक्षिपात्रमूर्णातंतुस्पर्शमात्रेणैव महतीं पीडामनुभवति॥ नेतर
दंगं॥ तथा विवेकी स्वल्पदुःखानुबंधेनापि विरज्यते॥ कथमित्याह॥ परिणामतापसंस्कारदुः
खैः॥ विषयाणामुपभुज्यमानानां यथायथं गर्धाभिवृद्धेस्तदप्राप्तिकृतस्य दुःखस्यापरिहार्य
त्वाद्दुःखांतरसाधनत्वाच्चास्त्येव दुःखरूपतेति परिणामदुःखत्वं॥ उपभुज्यमानेषु सुखसाध
नेषु तत्प्रतिपंथिनं प्रतिद्वेषस्य सर्वदैवावस्थितत्वात्सुखानुभवकालेपि तापदुःखं दुःपरिह
रमिति तापदुःखता॥ संस्कारदुःखत्वं त्वभिमतानभिमतविषयसंनिधाने सुखसंविदुपजा
यमाना तथाविधमेव स्वक्षेत्रे संस्कारमारभते॥ संस्काराच्च पुनस्तथाविधसंविदनुभव इत्य
परिमितसंस्कारोत्पत्तिद्वारेण संस्कारानुच्छेदात्सर्वस्यैव सुखस्य दुःखत्वं॥ गुणवृत्तिविरोधाच्चे
ति॥ गुणानां सत्त्वरजस्तमसां याः वृत्तयः सुखदुःखमोहरूपाः परस्परमभिभाव्याभिभावकत्वे

॥पा॰सू॰वृ॰॥ नविरुद्धाजायंतेतासांसर्वत्रैवदुःखानुवेधाद्दुःखत्वं॥एतदुक्तंभवति॥एकांतिकीमात्यंतिकीं
॥१४॥ चदुःखनिवृत्तिमिछतोविवेकिनउक्तरूपकारणचतुष्टयात्सर्वविषयादुःखरूपतयाप्रतिभां
ति॥तस्मात्सर्वकर्मविपाकोदुःखरूपएवेत्युक्तंभवति॥तदेवमुक्तस्यक्लेशकर्मविपाकाशय
राशेरविद्याप्रभवत्वादविद्यायाश्चमिथ्याज्ञानरूपतयासम्यक्ज्ञानेनोछेद्यत्वात्सम्यग्ज्ञा
नस्यचससाधनहेयोपादेयावधारणरूपत्वात्तदभिधानायाह॥ ॥हेयंदुःखमनागतं॥१६॥
भुक्तस्याप्यतिक्रांत[illegible]रूपत्वादनुभूयमानस्यचत्यक्तुमशक्यत्वादनागतमेवसंसारदुःखंहा
तव्यमित्युक्तंभवति॥१६॥हेयहेतुमाह॥ ॥द्रष्टृदृश्ययोःसंयोगोहेयहेतुः॥१७॥ ॥द्रष्टाचिद्रूपः
पुरुषः॥दृश्यंबुद्धिसत्त्वंतयोरविवेकख्यातिपूर्वकोयोसौसंयोगोभोग्यभोक्तृत्वेनसन्निधानं
सहेयस्यदुःखस्यगुणपरिणामरूपस्यसंसारस्यहेतुःकारणंतन्निवृत्त्यासंसारनिवृत्तिर्भव
तीत्यर्थः॥१७॥द्रष्टृदृश्ययोःसंयोगइत्युक्तंतत्रदृश्यस्वरूपंकार्यंप्रयोजनंचाह॥ ॥प्रकाश
क्रियास्थितिशीलंभूतेंद्रियात्मकंभोगापवर्गार्थंदृश्यं॥१८॥ ॥प्रकाशःसत्त्वधर्मः॥क्रियाप्र
वृत्तिरूपारजसः॥स्थितिर्नियमरूपातमसः॥ताःप्रकाशक्रियास्थितयःशीलंस्वाभाविकंरू
म पंयस्यतत्तथाविधमितिस्वरूपस्यनिर्दिष्टं॥भूतेंद्रियात्मकमिति॥भूतानिस्थूलसूक्ष्मभेदे
नद्विविधानिपृथिव्यादीनिगंधतन्मात्रादीनिच॥इंद्रियाणिबुद्धींद्रियकर्मेंद्रियांतःकरणभे ॥१४॥

देनत्रिविधानि॥उभयमेतद्ग्राह्यरूपमात्मास्वरूपाभिन्नःपरिणामोयस्यतत्तथाविध
मित्यनेनकार्यमस्योक्तं॥भोगःकथितलक्षणः॥अपवर्गोविवेकख्यातिपूर्विकासंसारनिवृत्तिः॥
तौभोगापवर्गावर्थःप्रयोजनंयस्यतत्तथाविधंदृश्यमित्यर्थः॥१८॥तस्यचदृश्यस्यनानाव
स्थारूपपरिणामकस्यहेयत्वेनज्ञातव्यत्वादवस्थाःकथयितुमाह॥ ॥विशेषाविशेषलिंगमा
त्रालिंगानिगुणपर्वाणि॥१९॥ ॥गुणानांपर्वाण्यवस्थाविशेषाश्चत्वारोज्ञातव्याइत्युपदिष्टंभव
ति॥तत्रविशेषामहाभूतेंद्रियाणि॥अविशेषास्तन्मात्रांतःकरणानि॥लिंगमात्रंबुद्धिः॥अलिं
त्रि गमव्यक्तमित्युक्तं॥सर्वत्रगुणरूपस्याव्यक्तस्यान्वयित्वेनप्रत्यभिज्ञानादवश्यज्ञातव्यत्वेनयो
गकालेचत्वारिपर्वाणिनिर्दिष्टानि॥एवंहेयत्वेनदृश्यस्यप्रथमंज्ञातव्यत्वात्तदवस्थासहितं
व्याख्यायोपादेयंद्रष्टारंव्याख्यातुमाह॥ ॥द्रष्टादृशिमात्रःशुद्धोपिप्रत्ययानुपश्यः॥२०॥ ॥द्रष्टा
पुरुषोदृशिमात्रश्चेतनामात्रः॥मात्रग्रहणंधर्मधर्मिनिरासार्थं॥केचिद्धिचेतनामात्मनोध
र्ममिछंति॥सशुद्धोपिपरिणामित्वाद्यभावेनस्वप्रतिष्ठोपिप्रत्ययानुपश्यः॥प्रत्ययाःविषयो
परक्तानिज्ञानानितानित्वव्यवधानेनप्रतिसंक्रमाद्यभावेनपश्यति॥एतदुक्तंभवति॥ज्ञानविष
योपरागायामेवबुद्धौसन्निधानमात्रेणैवपुरुषस्यद्रष्टृत्वं॥सएवचभोक्तेत्याह॥ ॥तदर्थएव
दृश्यस्यात्मा॥२१॥ ॥दृश्यस्यप्रागुक्तलक्षणस्ययआत्मायत्स्वरूपंसतदर्थस्तस्यपुरुषस्यभोक्तृ

॥पा·सू·वृ· त्वसंपादनंनामस्वार्थपरिहारेणप्रयोजनं॥नहिप्रधानंप्रवर्त्तमानमात्मनःकिंचित्प्रयोजनमपेक्ष्यप्र
॥१५॥ वर्त्तते॥पुरुषस्यभोगंसंपादयामीति॥यद्येवंपुरुषस्यभोगसंपादनंप्रयोजनंतेनतदानींसंपादितंतस्मिंते
नतन्निःप्रयोजनंविरतव्यापारंस्यात्॥तस्मिंश्चपरिणामशून्येशुद्धत्वात्सर्वेद्रष्टारोबंधरहिताःस्युः॥२१॥
ततश्चसंसारोच्छेदइत्याह॥ ॥कृतार्थंप्रतिनष्टमप्यनष्टंतदन्यसाधारणत्वात्॥२२॥ ॥यद्यपि
विवेकख्यातिपर्यंताद्भोगसंपादनात्कमपिकृतार्थंपुरुषंप्रतिनष्टंविरतोपभोगव्यापारमपिसर्वपु
रुषसाधारणत्वादन्यान्प्रत्यनष्टंसव्यापारमवतिष्ठते॥अतःप्रधानस्यसकलभोक्तृसाधारणत्वा
न्नकदाचनापिनाशः॥एकस्यमुक्तौवानसर्वेषांमुक्तिप्रसंगइत्युक्तंभवति॥२२॥दृश्यद्रष्टारोव्याख्या
यसंयोगंव्याख्यातुमाह॥ ॥स्वस्वामिशक्त्योःस्वरूपोपलब्धिहेतुःसंयोगः॥२३॥ ॥कार्यद्वारेण
स्वलक्षणंकरोति॥स्वशक्तिर्दृश्यस्यस्वभावः॥स्वामिशक्तिर्द्रष्टुःस्वरूपं॥तयोर्द्वयोरपिसंवेद्यसंवे
दकत्वेनव्यवस्थितयोर्यास्वरूपोपलब्धिस्तस्याःकारणंयःससंयोगः॥सचसहजःभोग्यभोक्तृ
स्वभावस्वरूपान्नान्यः॥नहितयोर्नित्ययोर्व्यापकयोश्चस्वरूपादतिरिक्तःकश्चित्संयोगः॥य
देवभोग्यस्यभोग्यत्वंभोक्तुश्चभोक्तृत्वमनादिसिद्धंसएवसंयोगः॥२३॥तस्यापिकारणमाह॥
॥ ॥तस्यहेतुरविद्या॥२४॥ ॥याएवंविपर्यासात्मिकामोहरूपाऽविद्याव्याख्यातासातस्याविवेक
ख्यातिरूपस्यसंयोगस्यकारणंहेयंहानक्रियाकर्मोच्यते॥२४॥किंपुनस्तद्धानमित्याह॥ ॥तद ॥१५॥

२

भावात्संयोगाभावोहानंतद्दृशेःकैवल्यं॥२५॥ ॥तस्याश्चाविद्यायाःस्वरूपविरुद्धेनसम्यग्ज्ञानेनो
न्मूलितायायोयमभावस्तस्मिन्सतितत्कार्यस्यसंयोगस्याप्यभावस्तद्धानमित्युच्यते॥अयमर्थः॥नैत
स्यमूर्त्तद्रव्यवत्परित्यागोयुज्यते॥किंतुजातायांविवेकख्यातावविवेकनिमित्तःसंयोगःस्वयमेवनि
वर्त्ततइतितस्यहानं॥यदेवचसंयोगस्यहानंतदेवनित्यकेवलस्यपुरुषस्यकैवल्यंव्यपदिश्यते॥तदे
वंसंयोगस्यरूपंकारणंकार्यंचाभिहितं॥२५॥अथहानोपायकथनद्वारेणोपादेयकारणमाह॥ ॥विवे
कख्यातिरविप्लवाहानोपायः॥२६॥ ॥अन्येगुणाअन्यःपुरुषइत्येवंविधस्यविवेकस्ययाख्यातिःप्र
ख्यासाहानस्यदृश्यपरित्यागस्योपायःकारणं॥कीदृशीअविप्लवा॥नविद्यतेविप्लवोविच्छेदोंतरां
तराव्युत्थानरूपोयस्याःसाऽविप्लवा॥इदमत्रतात्पर्यं॥प्रतिपक्षभावनाबलादविद्याप्रविलयेवि
निवृत्तकर्तृत्वभोक्तृत्वाभिमानायारजस्तमोमलानभिभूतायाबुद्धेरंतर्मुखायायाचिच्छायासंक्रां
तिःसाविवेकख्यातिरित्युच्यते॥तस्यांचसंततत्वेनप्रवृत्तायांदृश्याधिकारनिवृत्तेर्भवत्येवकैवल्यं॥२६॥
उत्पन्नविवेकख्यातेःपुरुषस्ययादृशीप्रज्ञाभवतितांकथयन्विवेकख्यातेरेवस्वरूपमाह॥ ॥
तस्यसप्तधाप्रांतभूमिःप्रज्ञा॥२७॥ ॥तस्योत्पन्नविवेकज्ञानस्यज्ञातस्यविवेकरूपाप्रज्ञाप्रांतभू
मौसकलसालंबनसमाधिभूमिपर्यंतेसप्तप्रकाराभवति॥तत्रकार्यमुक्तिरूपाचतुःप्रकारा॥
ज्ञातंमयाज्ञेयंनज्ञातव्यंध्येयंवाकिंचिदस्तीति॥क्षीणाःक्लेशानमेकिंचित्क्षेतव्यमस्ति॥अधिग

॥पा॰ सू॰ वृ॰॥ तं प्रयाज्ञाने॥ आप्रामया विवेकख्यातिरितिप्रत्ययांतरपरिहारेण तस्यामवस्थायामीदृश्येव प्रज्ञाजा
॥१९॥ यते॥ ईदृशी प्रज्ञा कार्यविषयं निर्मलं ज्ञानं कार्यविमुक्तिरित्युच्यते॥ चित्तमुक्तिस्त्रिधा॥ चरितार्था
मे बुद्धिः गुणा हृताधिकारा गिरिशिखरनिपतिता इव ग्रावाणो न पुनः स्थितिं यास्यंति स्वकारणे प्रल
याभिमुखानां मोहाभिधानमूलकारणाभावान्निःप्रयोजनत्वाच्चामीषां कुतः प्ररोहः॥ स्वात्मीभूत
श्च मे समाधिस्तस्मिन्सति स्वरूपनिष्ठोहमित्येतादृशी त्रिःप्रकारा चित्तस्वरूपविमुक्तिः॥ तदेवमी
दृश्यां सप्तविधप्रांतभूमिप्रज्ञायामुपजातायां पुरुषः केवल इत्युच्यते॥ विवेकख्यातिः संयोगाभा
वहेतुरित्युक्तं॥२७॥ तस्या उत्पत्तौ किं निमित्तमित्याह॥ ॥योगांगानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराबि
वेकख्यातेः॥२८॥ ॥योगांगानि वक्ष्यमाणानि तेषामनुष्ठानात् ज्ञानपूर्वकादभ्यासादाविवेकख्या
तेरशुद्धिक्षये चित्तसत्त्वस्य प्रकाशावरणक्लेशरूपाशुद्धिक्षये या ज्ञानदीप्तिस्तारतम्येन सात्त्विकः
परिणामो विवेकख्यातिपर्यंतः स तस्याः ख्यातेर्हेतुरित्यर्थः॥२८॥ योगांगानुष्ठानादशुद्धिक्षय इत्यु
क्तं॥ कानि पुनस्तानि योगांगानीति तेषामुद्देशमाह॥ ॥यमनियमासनप्राणायामप्रत्याहारधा
रणाध्यानसमाधयोऽष्टावंगानि॥२९॥ ॥इह कानिचित्समाधेः साक्षादुपकारकत्वेनांतरंगाण्यंगानि
यथा धारणादीनि॥ कानिचित्प्रतिपक्षभूतहिंसादिवितर्कोन्मूलनद्वारेण समाधिमुपकुर्वंति॥
यथा यमनियमादयः॥ तत्रासनादीनामुत्तरोत्तरमुपकारकत्वं॥ यथासत्यासनजये प्राणायाम ॥१९॥

स्य स्थैर्यं॥ एवमुत्तरत्रापि योज्यं॥२९॥ क्रमेणैषां स्वरूपमाह॥ ॥अहिंसासत्यास्तेयब्रह्मचर्यापरि
ग्रहा यमाः॥३०॥ ॥तत्र प्राणवियोगप्रयोजनो व्यापारो हिंसा॥ सा चानर्थहेतुः॥ तदभावोऽहिंसा॥ सर्वा
काल हिंसायाः सर्वप्रकारमेव परिहार्यत्वात्प्रथमं तदभावरूपाया अहिंसाया निर्देशः॥ सत्यं वाङ्मनसयो
र्यथार्थत्वं॥ स्तेयं परस्वापहरणं॥ तदभावोऽस्तेयं॥ ब्रह्मचर्यमुपस्थसंयमः॥ अपरिग्रहो भोगसाध
नानामस्वीकरणं॥ त एतेऽहिंसादयः पंच यमशब्दवाच्या योगांगत्वेन निर्दिष्टाः॥३०॥ एषां विशेषमा
ह॥ ॥एते जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतं॥३१॥ ॥जातिर्ब्राह्मणत्वादिः॥ देशस्ती
र्थादिः॥ कालश्चतुर्दश्यादिः॥ समयो ब्राह्मणप्रयोजनादिः॥ एतैश्चतुर्भिरनवच्छिन्नाः पूर्वोक्ता अहिं
सादयो यमाः॥ सर्वासु क्षिप्तादिषु चित्तभूमिषु भवा महाव्रतमित्युच्यते॥ तद्यथा॥ ब्राह्मणं न हनि
ष्यामि॥ तीर्थे कंचन न हनिष्यामि॥ चतुर्दश्यां न हनिष्यामि॥ देवब्राह्मणार्थव्यतिरेकेण न कम
पि हनिष्यामीति॥ एवंविधावच्छेदव्यतिरेकेण किंचित्क्वचित्कदाचित्कस्मिंश्चिदर्थे न हनि
ष्यामीत्यनवच्छिन्नाः॥ एवं सत्यादिषु यथायोगं योज्यं॥ इत्थमनियतीकृताः सामान्येनैव प्रवृत्ता
महाव्रतमित्युच्यते॥ न पुनः परिच्छिन्नावधारणं॥३१॥ नियमानाह॥ ॥शौचसंतोषतपःस्वाध्या
येश्वरप्रणिधानानि नियमाः॥३२॥ ॥शौचं द्विविधं॥ बाह्यमाभ्यंतरं च॥ बाह्यं मृज्जलादिभिः का
यादिक्षालनं॥ आभ्यंतरं मैत्र्यादिभिश्चित्तमलानां क्षालनं॥ संतोषस्तुष्टिः॥ शेषाः प्रागेवक्त

तव्याख्याताः ॥ एते शौचादयो नियमशब्दवाच्याः ॥३२॥ कथमेतेषां योगांगत्वमित्याह ॥ ॥वितर्कबा
धने प्रतिपक्षभावनं ॥३३॥ ॥वितर्क्यंत इति वितर्काः योगप्रतिपंथिनो हिंसादयस्तेषां बाधन
मरतिः ॥ प्रतिपक्षभावने सति यदा बाधो भवति तदा योगः सुकरो भवतीत्यतो भवत्येव योगां
गत्वं यमनियमादीनां ॥ इदानीं वितर्काणां स्वरूपं भेदं कारणं फलं च क्रमेणाह ॥ ॥वितर्का हिं
सादयः कृताः कारितानुमोदिता लोभक्रोधमोहपूर्वका मृदुमध्याधिमात्रा दुःखाज्ञानानंत
फला इति प्रतिपक्षभावनं ॥३४॥ ॥एते पूर्वोक्ता हिंसादयः प्रथमं त्रिधा भिद्यंते कृतकारितानुमो
दितभेदेन ॥ तत्र स्वयं निष्पादिताः कृताः ॥ कुरु कुर्विति प्रयोजकव्यापारेणान्यद्वारा कारिताः का
रिताः ॥ अन्येन क्रियमाणाः साध्विति अंगीकृताः ॥ एतच्च त्रैविध्यं परस्य व्यामोहनिराकरणावधा
रणायोच्यते ॥ अन्यथा मंदमतिरेवं मन्येत न मया हिंसा कृतेति नास्ति मे दोष इति ॥ एतेषां कारणप्रति
पादनायाह ॥ लोभक्रोधमोहपूर्वका इति ॥ यद्यपि लोभः प्रथमं सूत्रे निर्दिष्टस्तथापि सर्वक्लेशानां मो
हस्यानात्मन्यात्माभिमानलक्षणनिदानत्वात्तस्मिन्सति स्वपरविभागपूर्वकत्वेन लोभक्रोधादी
नामुद्भवात्तन्मूलत्वमवसेयं ॥ मोहपूर्विका दोषजातिरित्यर्थः ॥ लोभस्तृष्णा ॥ क्रोधः कृत्याकृत्य
विवेकोन्मूलनकरः प्रज्वलनात्मकश्चित्तधर्मः ॥ प्रत्येकं कृतादिभेदेन त्रिप्रकारा अपि हिंसा
दयो मोहादिकारणत्वेन त्रिधा भिद्यंते ॥ एषामेव पुनरवस्थाभेदेन त्रैविध्यमाह ॥ मृदुमध्याधि ॥१७॥

मात्राः ॥ मृदवो मंदाः ॥ न तीव्रा नापि मंदा मध्याः ॥ अधिमात्रास्तीव्राः ॥ पश्चादवस्थानभेदादित्थं त्रैविध्ये
सप्तविंशतिभेदा भवंति ॥ मृद्वादीनामपि प्रत्येकं मृदुमध्याधिमात्रभेदेन त्रैविध्यं भवति ॥ तद्यथायोगं
योज्यं ॥ मृदुमृदु मृदुमध्यो मृदुतीव्र इति ॥ एषां फलमाह ॥ दुःखाज्ञानानंतफलाः ॥ दुःखं प्रतिकूलतया
वभासमानो राजसश्चित्तधर्मः ॥ अज्ञानं मिथ्याज्ञानं संशयविपर्ययरूपं ॥ ते दुःखाज्ञाने अनंतमपरि
च्छिन्नं फलं येषां ते तथोक्ताः ॥ इत्थं तेषां स्वरूपकारणादिभेदेन ज्ञातानां प्रतिपक्षभावनया योगिना प
रिहारः कर्तव्य इत्युपदिष्टं भवति ॥ एषामभ्यासात्प्रकर्षमागच्छतामनुनिष्पादिन्यः सिद्धयो यथा भ
वंति तथा प्रतिपादयितुमाह ॥ ॥ अहिंसाप्रतिष्ठायां तत्संनिधौ वैरत्यागः ॥३५॥ ॥ तस्याहिंसां भावय
तः संनिधौ सहजविरोधिनामप्यहिनकुलादीनां वैरत्यागो निर्मत्सरतयावस्थानं भवति ॥ हिंस्रा हिं
स्रत्वं त्यजंतीत्यर्थः ॥३५॥ सत्याभ्यासवतः किं भवतीत्याह ॥ ॥ सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वं ॥३६॥
क्रियमाणा हि क्रिया यागादिकाः फलं स्वर्गादिकं प्रयच्छंति ॥ तस्य तु सत्याभ्यासवतो योगिनस्तथा सत्यं
प्रकृष्यते यथाऽकृतायामपि क्रियायां योगी फलमाप्नोति ॥ तद्वचनाद्यस्य कस्यचित्क्रियामकुर्वतो
पि फलं भवतीत्यर्थः ॥३६॥ अस्तेयाभ्यासवतः फलमाह ॥ ॥ अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानं ॥३७॥
अस्तेयं यदाभ्यस्यति योगी तदा तस्य तत्प्रकर्षान्निरभिलाषस्यापि सर्वतो दिक्कानि रत्नान्युपतिष्ठंते ॥३७॥
ब्रह्मचर्याभ्यासस्य फलमाह ॥ ॥ ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः ॥३८॥ ॥ यः किल ब्रह्मचर्यमभ्य

॥पा·सू·वृ·॥ स्यतितस्यतदुत्कर्षान्निरतिशयंवीर्यंसामर्थ्यमाविर्भवति॥ वीर्यनिरोधोहिब्रह्मचर्यं॥ तस्यतदुत्कर्षाच्छरीरें
॥१८॥ द्रियमनःसुवीर्यंप्रकर्षति॥३८॥ अपरिग्रहाभ्यासस्यफलमाह॥ ॥अपरिग्रहस्थैर्येजन्मकथंतासं
बोधः॥३९॥ ॥कथमित्यस्यभावःकथंता॥ जन्मनःकथंताजन्मकथंता॥ तस्याःसंबोधःसम्यग्ज्ञानं॥
जन्मांतरेकोऽहमासंकीदृशःकिंकार्यकारीतिजिज्ञासायांसर्वमेवसम्यक्जानातीत्यर्थः॥ नकेवलं
भोगसाधनपरिग्रहएवपरिग्रहः किंतुयावदात्मनःशरीरपरिग्रहेपिपरिग्रहोभोगसाधनत्वा
च्छरीरस्य॥ तस्मिन्सतिरागानुबंधाद्बहिर्मुखायामेवप्रवृत्तौनतात्त्विकज्ञानप्रादुर्भावः॥ यदापु
नःशरीरादिपरिग्रहनैरपेक्ष्येणमाध्यस्थ्यमवलंबतेतदामध्यस्थस्यरागत्यागात्सम्यग्ज्ञानहेतु
र्भवत्येवपूर्वापरजन्मसंबोधः॥३९॥ उक्तायमानांसिद्धयोनियमानामाह॥ ॥शौचात्स्वांगजुगु
प्सापरैरसंसर्गः॥४०॥ ॥यःशौचंभावयतितस्यस्वांगेष्वपिकारणस्वरूपपर्यालोचनद्वारेणजुगु
प्साघृणासमुपजायते॥ अशुचिरयंकायोनात्रानुग्रहःकर्त्तव्यइति॥ अमुनेवहेतुनापरैरन्यैश्च
कायवद्भिरसंसर्गःसंपर्काभावःसंसर्गपरिवर्जनमित्यर्थः॥ यःकिलस्वमेवकायंजुगुप्सतेतद त्तदवद्यनिंद्य॥
वद्यदर्शनात्मकथंपरकीयैस्तथाभूतैःकायैःसंसर्गमनुभवति॥४०॥ शौचस्यैवफलांतरमा
ह॥ ॥सत्त्वशुद्धिसौमनस्यैकाग्र्येंद्रियजयात्मदर्शनयोग्यत्वानिच॥४१॥ ॥भवंतीतिवाक्यशेषः॥ सत्त्व
प्रकाशसुखाद्यात्मकंतस्यशुद्धिःरजस्तमोभ्यामनभिभवः॥ सौमनस्यंखेदाननुभवेनमानसीप्रीतिः॥ ॥१८॥

णकाग्रतानियतेविषयेचेतसःस्थैर्यं॥ इंद्रियजयोविषयपराङ्मुखानामिंद्रियाणांस्वात्मन्येवस्थापनं॥
आत्मदर्शनेविवेकख्यातिरूपेचित्तस्ययोग्यत्वंसमर्थत्वं॥ शौचाभ्यासवतएतेसत्त्वशुद्ध्यादयःक्र
मेणप्रादुर्भवंति॥ तथाहि॥ सत्त्वशुद्धेःसौमनस्यं॥ सौमनस्यादेकाग्रता॥ एकाग्रतयेंद्रियजयः॥ इं
द्रियजयादात्मदर्शनयोग्यतेति॥४१॥ संतोषाभ्यासस्यफलमाह॥ ॥संतोषादनुत्तमसुखलाभः॥४२॥
संतोषप्रकर्षेणयोगिनस्तथाविधमांतरंसुखमाविर्भवतियस्यबाह्यंविषयसुखंशतांशेनापिनसं
मतं॥४२॥ तपसःफलमाह॥ ॥कायेंद्रियशुद्धिरशुद्धिक्षयात्तपसः॥४३॥ ॥तपःसमभ्यस्यमानं
चेतसःक्लेशादिलक्षणाशुद्धिक्षयद्वारेणकायेंद्रियाणांशुद्धिमुत्कर्षमादधाति॥ अयमर्थः॥ चांद्रायणा
दिनाचित्तक्लेशमलक्षयः॥ तत्क्षयादिंद्रियाणांसूक्ष्मव्यवहितविप्रकृ[illegible]ष्टदर्शनादिसामर्थ्यमावि
र्भवति॥ कायस्ययथेच्छमणुत्वमहत्त्वादीनि॥४३॥ स्वाध्यायस्यफलमाह॥ ॥स्वाध्यायादिष्टदेवता
संप्रयोगः॥४४॥ ॥अभिप्रेतमंत्रजपादिलक्षणेस्वाध्यायेप्रकृष्यमाणेयोगिनइष्टयाभिप्रेतया
देवतयासहसंप्रयोगोभवति॥ सादेवताप्रत्यक्षीभवतीत्यर्थः॥४४॥ ईश्वरप्रणिधानस्यफल
माह॥ ॥समाधिरीश्वरप्रणिधानात्॥४५॥ ॥ईश्वरेयोयंभक्तिविशेषस्तस्मात्समाधेरुक्तलक्ष
णस्याविर्भावोभवति॥ यस्मात्सभगवानीश्वरःप्रसन्नःसन्नंतरायरूपान्क्लेशान्परिहृत्यसमाधि
मुद्बोधयति॥४५॥ यमनियमानुक्त्वासनमाह॥ ॥स्थिरसुखमासनं॥४६॥ ॥आस्यतेनेनेत्या

 सने॥ पद्मासनदंडासनस्वस्तिकासनादि॥ तद्यदा स्थिरं निःकंपं सुखमनुद्वेजनीयं च भवति॥ त
 दा तद्योगांगतां भजते॥४६॥ तस्यैव स्थिरसुखत्वप्राप्त्यर्थमुपायमाह॥ ॥प्रयत्नशैथिल्यानंत्यसमा
पत्तिभ्यां॥४७॥ ॥तदासनं प्रयत्नशैथिल्येनानंत्यसमापत्त्या च स्थिरं सुखं भवतीति संबंधः॥ य
दासनं बध्नामीतीच्छां करोति प्रयत्नशैथिल्येप्यक्लेशेनैव तदाऽसनं संपद्यते॥ यदा चाकाशगते
आनंत्ये चेतसः समापत्तिः क्रियतेऽवधानेन तादात्म्यमापद्यते तदा देहाहंकाराभावान्नासनं
दुःखजनकं भवति॥ तस्मिंश्चासनजये सति समाध्यंतरायभूता न प्रभवंत्यंगमेजत्वादयः॥४७॥
तस्यैवानुनिष्पादितं फलमाह॥ ॥ततो द्वंद्वानभिघातः॥४८॥ तस्मिन्नासनजये सति द्वंद्वैः शी
तोष्णक्षुधातृष्णादिभिर्योगी नाभिहन्यत इत्यर्थः॥ आसनजयानंतरं प्राणायाममाह॥ ॥तस्मि
न्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः॥४९॥ ॥आसनस्थैर्ये सति तन्निमित्तकः प्राणा
यामलक्षणो योगांगविशेषोऽनुष्ठेयो भवति॥ कीदृशः श्वासप्रश्वासयोर्गतिविच्छेदलक्षणः॥ श्वा
सप्रश्वासौ उक्तलक्षणौ तयोर्द्वेधा रेचनपूरणद्वारेण बाह्याभ्यंतरस्थानेषु गतेः प्रवाहस्य विच्छे
दो धारणं प्राणायाम उच्यते॥४९॥ अस्यैव तु सुखावगमाय विभज्य रूपं कथयति॥ ॥स तु बाह्या
भ्यंतरस्तंभवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मः॥५०॥ ॥बाह्यवृत्तिः श्वासो रेचकः॥
अंतर्वृत्तिः प्रश्वासः पूरकः॥ अंतःस्तंभवृत्तिः कुंभकः॥ तस्मिन्जलमिव कुंभे निश्चलतया प्राणाव

स्थाप्यते इति त्रिविधोऽयं प्राणायामो देशेन कालेन संख्यया चोपलक्षितो दीर्घसूक्ष्मसंज्ञो भवति॥ देशेनो
पलक्षितो यथा नासाद्वादशांतादौ॥ कालेनोपलक्षितो यथा षट्त्रिंशन्मात्रादिप्रमाणः॥ संख्ययोप
लक्षितो यथा इयतो वारान्कृत एतावद्भिः श्वासप्रश्वासैः प्रथम उद्घातो भवतीति॥ एतदभिज्ञान
प संख्याग्रहणमुपात्तं॥ उद्घातो नाम नाभिमूलात्प्रेरितस्य वायोः शिरस्यभिहननं॥५०॥ त्रीन्प्राणायामा
नभिधाय चतुर्थमभिधातुमाह॥ ॥बाह्याभ्यंतरविषयाक्षेपी चतुर्थः॥५१॥ ॥प्राणस्य बाह्यो विष
यो द्वादशांतादिः॥ आभ्यंतरो विषयो हृदयनाभिचक्रादिः॥ तौ द्वौ विषयावाक्षिप्य पर्यालोच्य यः चक्रादिः
स्तंभरूपो गतिविच्छेदः स चतुर्थः प्राणायामः॥ तृतीयात्कुंभकाख्यादयमस्य विशेषः॥ स बाह्या
भ्यंतरौ विषयावपर्यालोच्यैव सहसा तप्तोपलपतितजलन्यायेन युगपत्कुंभकवृत्त्या निष्पाद्यते॥
अस्य तु विषयद्वयाक्षेपको निरोधः॥ अयमपि पूर्ववद्देशकालसंख्याभिरुपलक्षितो द्रष्टव्यः॥५१॥
चतुर्विधस्याप्यस्य फलमाह॥ ॥ततः क्षीयते प्रकाशावरणं॥५२॥ ॥तस्मात्प्राणायामात्प्रकाशस्य
चित्तसत्वगतस्य यदावरणं क्लेशरूपं तत्क्षीयते विनश्यतीत्यर्थः॥५२॥ फलांतरमाह॥ ॥धारणासु
च योग्यता मनसः॥५३॥ ॥धारणा वक्ष्यमाणलक्षणाः॥ तासु प्राणायामैः क्षीणदोषं मनो यत्र य
त्र धार्यते तत्र तत्र स्थिरीभवति न विक्षेपं भजते॥५३॥ प्रत्याहारस्य लक्षणमाह॥ ॥स्वस्वविषया
संप्रयोगे चित्तस्वरूपानुकार इवेंद्रियाणां प्रत्याहारः॥५४॥ ॥इंद्रियाणि विषयेभ्यः प्रतीपमा

क्रियंते यस्मिन्स प्रत्याहारः॥ स च कथं निष्पद्यत इत्याह॥ चक्षुरादीनामिंद्रियाणां स्वस्वविषयोस्प्र
दिस्तेन संप्रयोगस्तदाभिमुख्येन वर्त्तनं तदभावस्तदाभिमुख्यं परित्यज्य स्वरूपमात्रेवस्थानं॥ तस्मि
न्सति चित्तमात्रानुकारीणि सर्वाणींद्रियाणि भवंति॥ यतश्चित्तमनुवर्त्तमानानि मधुकरराजमि
व मक्षिकाः सर्वाणींद्रियाणि प्रतीयंते॥ अतश्चित्तनिरोधे तानि प्रत्याहृतानि भवंति॥ तेषां तत्स्वरू
पानुकारः प्रत्याहार उक्तः॥५४॥ फलमाह॥ ॥ततः परमा वश्यतेंद्रियाणां॥५५॥ ॥अभ्यस्यमाने हि प्र
त्याहारे तथा वश्यान्यायत्तानींद्रियाणि संपद्यंते॥ यथा बाह्यविषयाभिमुख्यतां नीयमानान्यपि
न यांतीत्यर्थः॥५५॥ तदेवं प्रथमपादोक्तलक्षणस्य योगस्यांगभूतं क्लेशतनूकरणफलं क्रिया
योगमभिधाय क्लेशानामुद्देशं स्वरूपं कारणं क्षेत्रं फलं चोक्त्वा कर्मणामपि भेदं कारणं स्वरूपं
फलं चाभिधाय विपाकस्य स्वरूपं कारणं चाभिहितं॥ ततस्त्याज्यत्वात्क्लेशादीनां ज्ञानव्यतिरे
केण त्यागस्याशक्यत्वात् ज्ञानस्य च शास्त्रायत्तत्वाच्छास्त्रस्य हेयहानकारणोपादेयोपादानका
रणत्वेन चतुर्व्यूहत्वात् हेयस्य च हानव्यतिरेकेण स्वरूपानिष्पत्ते हानसहितं चतुर्व्यूहं स्वस्वका
रणसहितमभिधायोपादेयकारणभूताया विवेकख्यातेः कारणभूतानामंतरंगबहिरंगभा
वेन स्थितानां योगांगानां यमादीनां रूपं फलसहितं व्याकृत्य धारणापर्यंतानां चासनादीनां पर
स्परमुपकार्योपकारकभावेनावस्थितानामुद्देशमभिधाय प्रत्येकलक्षणपूर्वं फलमभिहि ॥२०॥

तं॥ तदयं योगो यमादिभिः प्राप्तबीजभावः आसनप्राणायामैरंकुरितः प्रत्याहारेण पुष्पितो ध्या
नधारणासमाधिभिः फलिष्यतीति व्याख्यातः साधनपादः॥ ॥इति श्रीमहाराजाधिराजश्री
भोजदेवविरचितायां राजमार्त्तंडाभिधायां पातंजलयोगशास्त्रवृत्तौ द्वितीयः साधनपादः॥२॥
यत्पादपद्मस्मरणाद्दणिमादिविभूतयः॥ भवंति तं विनामस्तु भूतनाथः स भूतये॥१॥ ॥तदेवं पू
र्वोद्दिष्टं धारणाद्यंगत्रयं निर्णेतुं संयमसंज्ञाभिधानपूर्वकं बाह्याभ्यंतरादिसिद्धिप्रतिपादनाय
लक्षयितुमुपक्रमते॥ तत्र धारणायाः स्वरूपमाह॥ ॥देशबंधश्चित्तस्य धारणा॥१॥ ॥देशे नाभि
चक्रनासाग्रादौ चित्तस्य बंधो विषयांतरपरिहारेण यत्स्थिरीकरणं सा चित्तस्य धारणाद्वेनोधा
रणेत्युच्यते॥ अयमर्थः॥ मैत्र्यादिचित्तपरिकर्मवासितांतःकरणेन यमनियमवता जितासने
न परिहृतप्राणविक्षेपेण प्रत्याहृतेंद्रियग्रामेण निर्बाधप्रदेशे ऋजुकायेन जितद्वंद्वेन योगि
ना नासाग्रादौ संप्रज्ञातस्य समाधेरभ्यासाय चेतसः स्थिरीकरणं कर्त्तव्यमिति॥१॥ धारणामभि
धाय ध्यानमभिधातुमाह॥ ॥तत्र प्रत्ययैकतानता ध्यानं॥२॥ ॥तत्र तस्मिन्देशे यत्र चित्तं धृ
तं तत्र प्रत्ययस्य ज्ञानस्य या एक[illegible]तानता विसदृशपरिणामपरिहारद्वारेण यदेव धारणाया
मालंबनीकृतं तदालंबनतयैव निरंतरमुत्पत्तिः सा ध्यानमित्युच्यते॥२॥ चरमं योगांगं समा
धिमाह॥ ॥तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः॥३॥ ॥तदेवोक्तलक्षणं ध्यानं यत्रा

॥पा॰सू॰वृ॰॥ र्थमात्रनिर्भासंस्वर्थाकारसमावेशाद्भूतार्थस्वरूपंन्यग्भूतज्ञानस्वरूपत्वेनरूपशून्यतामिवाप
॥२१॥ द्यतेससमाधिरित्युच्यते॥सम्यगाधीयतएकाग्रीक्रियतेविक्षेपान्परिहृत्ययत्रमनःससमाधिः॥३॥
उक्तलक्षणस्ययोगांगत्रयस्यव्यवहारायस्वशास्त्रेतांत्रिकींसंज्ञांकर्त्तुमाह॥ ॥त्रयमेकत्रसंयमः॥४॥
एकस्मिन्विषयेधारणाध्यानसमाधित्रयंप्रवर्त्तमानंसंयमसंज्ञयाशास्त्रेव्यवह्रिय
ते॥४॥तस्यफलमाह॥ ॥तज्जयात्प्रज्ञालोकः॥५॥ ॥तस्यसंयमस्यजयादभ्यासेनसारोत्पादनात्प्र म्य
ज्ञायाज्ञातव्यविवेकरूपायाआलोकःप्रसरोभवति॥प्रज्ञाज्ञेयंसम्यगवभासयतीत्यर्थः॥५॥
तस्योपयोगमाह॥ ॥तस्यभूमिषुविनियोगः॥६॥ ॥तस्यसंयमस्यभूमिषुस्थूलसूक्ष्मालंबनभेदे
नस्थितासुचित्तवृत्तिषुविनियोगःकर्त्तव्यः॥अधरामधरांचित्तभूमिंजितांज्ञात्वोत्तरस्यांउत्तरस्यां
भूमौसंयमःकार्यः॥नह्यनात्मीकृताधरभूमिरुत्तरस्यांभूमौसंयमंकुर्वाणःफलभाग्भवति॥६॥सा
धनपादेयोगांगान्यष्टावुद्दिश्यपंचानांलक्षणंविधायत्रयाणांकथंनलक्षणमित्याशंक्याह॥ ॥त्रयम
न्तरंगंपूर्वेभ्यः॥७॥ ॥पूर्वेभ्योयमादिभ्योयोगांगेभ्यःपारंपर्येणसमाधेरुपकारकेभ्योधारणादियो
गांगत्रयंसंप्रज्ञातस्यसमाधेरंतरंगं॥समाधिस्वरूपनिष्पादनात्॥तस्यापिसमाध्यंतरापेक्षया
बहिरंगत्वमाह॥ ॥तदपिबहिरंगंनिर्बीजस्य॥८॥ ॥निर्बीजस्यनिरालंबनस्यशून्यभावनापर
पर्यायस्यसमाधेस्तदप्यंतरंगत्रयंबहिरंगंपारंपर्येणोपकारकत्वात्॥८॥इदानींयोगसिद्धीर ॥२१॥

ख्यातुकामःसंयमस्यविषयपरिशुद्धिंकर्त्तुंक्रमेणपरिणामत्रयमाह॥ ॥व्युत्थाननिरोधसंस्कारयोर
भिभवप्रादुर्भावौनिरोधक्षणचित्तान्वयोनिरोधपरिणामः॥९॥ ॥व्युत्थानंक्षिप्तमूढविक्षिप्ताख्यंभू
मित्रयं॥निरोधःप्रकृष्टसत्त्वस्यांगितयाचेतसःपरिणामः॥ताभ्यांव्युत्थाननिरोधाभ्यांयौजनितौसंस्का नि
रौतयोर्यथाक्रममभिभवप्रादुर्भावौ॥अभिभवोन्यग्भूततयाकार्यकरणासामर्थ्येनावस्थानं॥प्रादुर्भा न
रूप वोवर्त्तमानेध्वनिअभिव्यक्तंतयाऽवस्थानं॥तदानिरोधक्षणेचित्तस्योभयक्षणवृत्तित्वादन्वयोथः
सनिरोधपरिणामइत्युच्यते॥अयमर्थः॥यदाव्युत्थानरूपोधर्मस्तिरोभवति॥निरोधसंस्काररूप
श्चाविर्भवति॥धर्मिरूपतयाचित्तमुभयत्रान्वयित्वेनावस्थितंप्रतीयते॥तदासनिरोधःपरिणा
मशब्देनव्यवह्रियते॥चलत्वाद्गुणवृत्तस्य॥यद्यपिचेतसोनिश्चलत्वंनास्तितथाप्येवंभूतःपरिण
मःस्थैर्यमुच्यते॥९॥तस्यैवफलमाह॥ ॥तस्यप्रशांतवाहितासंस्कारात्॥१०॥तस्यचेतसउक्तानि
रोधसंस्कारात्प्रशांतवाहिताभवति॥परिहृतविक्षेपतयासदृशप्रवाहपरिणामंचित्तंभवतीत्यु
क्तं॥१०॥निरोधपरिणाममभिधायसमाधिपरिणाममाह॥ ॥सर्वार्थतैकाग्र्ययोःक्षयोदयौचित्त न
स्यसमाधिपरिणामः॥११॥ ॥सर्वार्थताचलत्वान्नानाविधार्थग्रहणंचित्तस्यधर्मः॥एकस्मिन्नेवा
लंबनेसदृशपरिणामिताएकाग्रतातदपिचित्तस्यधर्मः॥तयोर्यथाक्रमंक्षयोदयौसर्वार्थतालक्ष
णस्यक्षयोत्यंतमभिभवः॥एकाग्रतालक्षणस्यधर्मस्यप्रादुर्भावोभिव्यक्तिः॥चित्तस्योद्रिक्तसत्त्वस्या

॥पा॰ सू॰ वृ॰॥ न्वयितयाऽवस्थानं समाधिपरिणाम इत्युच्यते॥ पूर्वस्मात्परिणामादस्यायं विशेषः॥ तत्र संस्कारलक्ष
॥२२॥ णयोर्धर्मयोरभिभवप्रादुर्भावौ॥ पूर्वस्य व्युत्थानसंस्काररूपस्य धर्मस्यान्यग्भावउत्तरस्य निरोधसं
स्काररूपस्योद्भवोनभिभूतत्वेनावस्थानं॥ इह तु क्षयोदया विति सर्वार्थतारूपविक्षेपस्यात्यंतति
रस्कारादनुत्पत्तिरतीतेध्वनिप्रवेशः क्षयः॥ एकाग्रतालक्षणस्य धर्मस्योद्भवो वर्त्तमानेध्वनिप्रक
टत्वं॥११॥ तृतीयमेकाग्रतापरिणाममाह॥ ॥शांतोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः॥१२॥
समाहितस्यैव चित्तस्यैकः प्रत्ययो वृत्तिविशेषः शांतोतीतमध्वानं प्रविष्टः॥ अपरस्तूदितो वर्त्तमा
नेध्वनि स्फुरितः॥ द्वावपि समाहितचित्तत्वेन तुल्यावेकरूपालंबनत्वेन सदृशौ प्रत्ययौ उभयत्रापि
समाहितस्यैव चित्तस्यान्वयित्वेनावस्थानं यत्स एकाग्रतापरिणाम इत्युच्यते॥ चित्तपरिणामोक्तं
स्वरूपमन्यत्रातिदिशन्नाह॥ ॥एतेन भूतेंद्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः॥१३॥ ॥
एतेन त्रिविधोक्तेन चित्तस्य परिणामेन भूतेषु स्थूलसूक्ष्मेषु॥ इंद्रियेषु बुद्धिकर्मांतःकरणभेदेन व्य
वस्थितेषु धर्मलक्षणावस्थाभेदेन त्रिविधः परिणामो व्याख्यातो वगंतव्यः॥ अवस्थितस्य धर्मिणः पू
र्वधर्मनिवृत्तौ धर्मांतरापत्तिर्धर्मपरिणामः॥ यथा मृल्लक्षणस्य धर्मिणः पिंडरूपधर्मपरित्यागेन
घटरूपधर्मांतरस्वीकारो धर्मपरिणाम इत्युच्यते॥ लक्षणपरिणामो यथा॥ तस्यैव घटस्यानाग
ताध्वपरित्यागेन वर्त्तमानाध्वस्वीकारस्तत्परित्यागेन वातीताध्वपरिग्रहः॥ अवस्थापरिणामो य ॥२२॥

था॥ तस्यैव घटस्य प्रथमद्वितीययोः सदृशयोः क्षणयोरन्वयित्वेन च सत्त्वं चलगुणवृत्तेनापरिणममानं क्ष
णमप्यस्ति॥ ननु कोयं धर्मीत्याशंक्य धर्मिणो लक्षणमाह॥ ॥शांतोदिताव्यपदेश्यधर्मानुपाती धर्मी॥१४॥
शांता ये कृतस्वस्वव्यापारा अतीतेध्वनि अनुप्रविष्टाः॥ उदिता ये अनागतमध्वानं परित्यज्य स्वं स्वं व्यापा वाध्यं
रं कुर्वंति॥ अव्यपदेश्या ये शक्तिरूपेण स्थिता व्यपदेष्टुं न शक्यंते॥ तेषां यथा स्वं सर्वं सर्वात्मकमित्ये
वमादयो नियतकार्यकरणरूपतया योग्यतया विच्छिन्नाः शक्तिरेवेह धर्मशब्देनाभिधीयते॥ तं
त्रिविधमपि धर्मं योनुपतत्यनुवर्त्ततेऽन्वयित्वेन स्वीकरोति स शांतोदिताव्यपदेश्यधर्मानुपाती
धर्मीत्युच्यते॥ यथा सुवर्णं रुचकरूपधर्मपरित्यागेन स्वस्तिकरूपधर्मांतरपरिग्रहे सुवर्ण
रूपतयाऽनुवर्त्तमानं तेषु धर्मेषु कथंचिद्भिन्नेषु धर्मिरूपतया सामान्यात्मना धर्मरूपतया विशे
षात्मना स्थितमनुयायित्वेनावभासते॥१४॥ एकस्य धर्मिणः कथमनेके परिणामा इत्याशंकामप
नेतुमाह॥ ॥क्रमान्यत्वं परिणामान्यत्वे हेतुः॥१५॥ ॥धर्माणामुक्तलक्षणो यः क्रमस्तस्यान्यत्व
तिक्षणमन्यत्वं परिदृश्यमानं परिणामस्यैकस्य लक्षणस्यान्यत्वे नानाविधत्वे हेतुर्लिंगं ज्ञापकं भवति॥
अयमर्थः॥ योयं नियतः क्रमो मृच्चूर्णान्मृत्पिंडस्ततः कपालानि तेभ्यो घट इत्येवंरूपः परिदृश्य
मानः परिणामस्यान्यत्वमावेदयति॥ तस्मिन्नेव धर्मिणि यो लक्षणपरिणामस्यावस्थापरिणाम
स्य च क्रमः सोप्यनेनैव न्यायेन परिणामान्यत्वे गमको वगंतव्यः॥ सर्वेष्वेव भावा नियतेनैव क्रमे

ण प्रतिक्षणं परिणममाना दृश्यंते॥ अतः सिद्धं क्रमान्यत्वात्परिणामान्यत्वं॥ सर्वेषां च चित्तविषया
दीनां परिणममानानां च केचिद्धर्माः प्रत्यक्षेणैवोपलभ्यंते॥ यथा सुखादयः संस्थानादयश्च॥ केचिदे
कांतेनानुमानगम्याः॥ यथा धर्मसंस्कारशक्तिप्रभृतयः॥ धर्मिणश्च भिन्नाभिन्नरूपतया सर्व चित्त
त्रानुगमः॥१५॥ इदानीमुक्तसंयमस्य विषयप्रदर्शनद्वारेण सिद्धीः प्रतिपादयितुमाह॥ ॥प
रिणामत्रयसंयमादतीतानागतज्ञानं॥१६॥ ॥धर्मलक्षणावस्थाभेदेन यत्परिणामत्रयमुक्तं॥
तत्र संयमात्तस्मिन्विषये पूर्वोक्तस्य संयमस्य करणादतीतानागतज्ञानं योगिनः समाधिफलं
भवति॥ इदमत्र तात्पर्यं॥ अस्मिन्धर्मिणि अयं धर्म इदं लक्षणमियमवस्था चानागतादध्वनः
समेत्य वर्त्तमानेऽध्वनि स्वव्यापारं विधायातीतमध्वानं प्रविशतीत्येवं परिहृतविक्षेपतया यदा
संयमं करोति तदा यत्किंचिदतिक्रांतमनुत्पन्नं वा तत्सर्वं योगी जानाति॥ यतश्चित्तस्य शुद्धस
त्त्वप्रकाशरूपत्वात्सर्वार्थग्रहणसामर्थ्यमविद्यादिभिर्विक्षेपैरजस्रं परिक्षियते॥ यदा तु तैस्तैरु
पायैर्विक्षेपाः परिक्षियंते तदा निवृत्तमलस्येवादर्शस्य सर्वार्थग्रहणसामर्थ्यमेकाग्रताबला
दाविर्भवति॥१६॥ सिद्ध्यंतरमाह॥ ॥शब्दार्थप्रत्ययानामितरेतराध्यासात्संकरस्तत्प्रविभाग
संयमात्सर्वभूतरुतज्ञानं॥१७॥ ॥शब्दः श्रोत्रेंद्रियग्राह्यो नियतक्रमवर्णात्मा नियतैकार्थप्र
तिपत्त्यवच्छिन्नः॥ यदि वाक्रमरहितः स्फोटात्मा ध्वनिः शास्त्रसंस्कृतबुद्धिग्राह्यः॥ उभयथापि ॥२३॥

पदरूपो वाक्यरूपश्च तयोरेकार्थप्रतिपत्तौ सामर्थ्यात्॥ अर्थो जातिगुणक्रियादिः॥ प्रत्ययो ज्ञानं विष
याकारा बुद्धिवृत्तिः॥ एषां शब्दार्थज्ञानानां व्यवहारे इतरेतराध्यासाद्भिन्नानामपि बुद्ध्येकरूपता संपाद
नात्संकीर्णत्वं॥ तथाहि॥ गामानयेत्युक्ते कश्चिद्गोलक्षणमर्थं गोत्वजात्यवच्छिन्नं सास्नादिमत्पिंडरूपं
शब्दं च तद्वाचकं ज्ञानं च तद्ग्राहकमभेदेनैवाध्यवस्यति॥ न त्वस्य गोशब्दो वाचकोऽयं गोशब्दस्य वाच्य
योऽर्थ इदं ग्राहकं ज्ञानमिति भेदेन व्यवहरति॥ तथाहि॥ कोऽयमर्थः कोऽयं शब्दः किमिदं ज्ञानमिति पृष्टः
सर्वत्रैकरूपमेवोत्तरं ददाति॥ गौरिति॥ स यद्येकरूपतां न प्रतिपद्यते कथमेकमुत्तरं प्रयच्छति॥ ए
तस्मिन्स्थिते योऽयं प्रविभागः इदं शब्दस्य तत्त्वं यद्वाचकत्वं नाम॥ इदमर्थस्य यद्वाच्यत्वं॥ इदं ज्ञानस्य य
त्प्रकाशकत्वमिति प्रविभागं विधाय तस्मिन्प्रविभागे यः संयमं करोति तस्य सर्वेषां भूतानां मृग
पशुपक्षिसरीसृपादीनां यद्रुतं यः शब्दः तत्र ज्ञानमुत्पद्यते॥ अनेनाभिप्रायेणैतेनायं शब्दः समुच्चा
रित इति सर्वं जानाति॥१७॥ सिद्ध्यंतरमाह॥ ॥संस्कारसाक्षात्करणात्पूर्वजातिज्ञानं॥१८॥ ॥द्विधा वि
श्चित्तस्य वासनारूपाः संस्काराः॥ केचित्स्मृतिमात्रोत्पादनफलाः॥ केचिज्जात्यायुर्भोगलक्षणपाक
हेतवः॥ यथा धर्माधर्माख्याः॥ तेषु संस्कारेषु यदा संयमं करोति॥ एवं मया सोऽर्थोऽनुभूत एवं मया
सा क्रिया निष्पादितेति पूर्ववृत्तं सर्वमनुसंदधानो भावयन्नेवावबोधकमंतरेणोद्बुद्धसंस्कारः
सर्वमतीतं स्मरति॥ क्रमेण साक्षात्कृतेषु तेषु संस्कारेषु पूर्वजन्मानुभूतानपि जात्यादीन्प्रत्यक्षे

॥पा·सू·वृ·॥ एपश्यति॥१८॥ सिद्ध्यंतरमाह॥ ॥प्रत्ययस्य परचित्तज्ञानं॥१९॥ ॥प्रत्ययस्य परचित्तस्य केनचिन्मु मु
॥२४॥ खरागादिना लिंगेन गृहीतस्य यदा संयमं करोति तदा परकीयस्य चित्तस्य ज्ञानमुत्पद्यते॥ सरागम
स्य चित्तं विरागं चेति परचित्तगतानपि धर्मान्जानातीत्यर्थः॥ अस्यैव परचित्तज्ञानस्य विशे
षमाह॥ ॥न तत्सालंबनं तस्याविषयीभूतत्वात्॥२०॥ ॥तस्य परस्य यच्चित्तं तत्सालंबनं स्वकीयालंब
नेन सहितं न शक्यते ज्ञातुमालंबनस्य केनचिल्लिंगेनाविषयीकृतत्वात् लिंगाच्चित्तमात्रं परस्याव
गतं न तु नीलविषयमस्य चित्तं पीतविषयमिति वा यत्र न गृहीतं तत्र संयमस्य कर्तुमशक्यत्वान्न भ त्र·
वति परचित्तस्य यो विषयस्तत्र ज्ञानं॥ तस्मात्परकीयचित्तेनालंबनेन सहितं न गृह्यते॥ तस्यालंबनस्या
गृहीतत्वाच्चित्तधर्माः पुनर्गृह्यंत एव॥ यदा तु किमनेनालंबितं चित्तमिति प्रणिधानं करोति तदा तत्संयमा
त्तद्विषयमपि ज्ञानमुत्पद्यत एव॥२०॥ सिद्ध्यंतरमाह॥ ॥कायरूपसंयमात्तद्ग्राह्यशक्तिस्तंभे चक्षुः
प्रकाशासंयोगेंतर्धानं॥२१॥ ॥कायः शरीरं तस्य रूपं चक्षुर्ग्राह्यो गुणविशेषस्तस्मिन्काये इदं रू
पमिति संयमात्तस्य रूपस्य चक्षुर्ग्राह्यत्वरूपाया शक्तेस्तस्याः स्तंभे भावनावशात्प्रतिबंधे चक्षुः
प्रकाशासंयोगे चक्षुषः प्रकाशः सत्वधर्मस्तस्यासंयोगे तद्ग्रहणव्यापाराभावे योगिनोंतर्धानं भ
वति॥ [illegible] न केनचिद्दृश्यत इत्यर्थः॥२१॥ ॥एतेन शब्दाद्यंतर्धानमुक्तं वेदितव्यं॥२२॥ ॥एते
नैव रूपाद्यंतर्धानोपायप्रदर्शनेन शब्दादीनां श्रोत्रादिग्राह्याणामंतर्धानमुक्तं वेदितव्यं॥२२॥ सि ॥२४॥

द्ध्यंतरमाह॥ ॥सोपक्रमं निरुपक्रमं च कर्म तत्संयमादपरांतज्ञानमरिष्टेभ्यो वा॥२३॥ ॥आयुर्विपा
कं यत्पूर्वकृतं कर्म तद्द्विःप्रकारं॥ सोपक्रमं निरुपक्रमं च॥ तत्र सोपक्रमं यत्फलजननायोपक्रमेण
कार्यकरणाभिमुख्येन सह वर्त्तते॥ यथोष्णप्रदेशे प्रसारितमार्द्रवस्त्रं शीघ्रमेव शुष्यति॥ उक्तरूप
विपरीतं निरुपक्रमं॥ यथा तदेवार्द्रवासः संवर्त्तितमनुष्णप्रदेशे चिरेण शोषमेति॥ तस्मिन्द्विवि
धे कर्मणि यः संयमं करोति किं कर्म शीघ्रविपाकं किं चिरविपाकमिति॥ एवं ध्यानदार्ढ्यादपरांत
ज्ञानमस्योत्पद्यते॥ अपरांतः शरीरवियोगः॥ तस्मिन्ज्ञानममुष्मिन्कालेमुष्मिन्देशे मम शरी
रवियोगो भविष्यतीति निःसंशयं जानाति॥ अरिष्टेभ्यो वा॥ अरिष्टानि त्रिविधानि॥ आध्यात्मिकाधि
भौतिकाधिदैविकभेदेन॥ तत्राध्यात्मिकानि पिहितकर्णः कोष्ठस्य वायोर्घोषं न शृणोतीत्येवमादी
नि॥ आधिभौतिकान्यकस्माद्विकृतपुरुषदर्शनादीनि॥ आधिदैविकान्यकांडे एव द्रष्टुमशक्य
स्वर्गादिपदार्थदर्शनादीनि॥ तेभ्यः शरीरवियोगकालं जानाति॥ यद्यप्ययोगिनामप्यरिष्टेभ्यः प्रा
येण ज्ञानमुत्पद्यते॥ तदपि तेषां तत्सामान्याकारेण संशयरूपं॥ योगिनां पुनर्नियतकालदेशत
या प्रत्यक्षवदव्यभिचारि॥ परिकर्मनिष्पन्नभूताः सिद्धीः प्रतिपादयितुमाह॥ ॥मैत्र्यादिषु बला
नि॥२४॥ ॥मैत्रीकरुणामुदितोपेक्षासु यो विहितः संयमस्तस्य बलानि मैत्र्यादीनां संबंधीनि प्रा
दुर्भवंति॥ मैत्रीकरुणामुदितास्तथास्य प्रकर्षं गच्छंति॥ यथा सर्वस्य मित्रत्वादिकं संप्रतिपद्य

ने॥२४॥ सिद्ध्यंतरमाह॥ ॥बलेषु हस्तिबलादीनि॥२५॥ ॥हस्त्यादिसंबंधिषु कृतसंयमस्य तद्बला
निहस्त्यादिबलान्याविर्भवंति॥ तदयमर्थः॥ यस्मिन् हस्तिनि हस्तिबले वा वायुवेगे वा सिंहवीर्ये
वा तन्मयीभावेन संयमं करोति तत्सर्वं सामर्थ्ययुक्तत्वात्सर्वमस्य प्रादुर्भवतीत्यर्थः॥२५॥ सिद्ध्यं
तरमाह॥ ॥प्रवृत्त्यालोकन्यासात्सूक्ष्मव्यवहितविप्रकृष्टज्ञानं॥२६॥ ॥प्रवृत्तिर्विषयवती ज्यो
तिष्मती च प्रागुक्ता तस्यां य आलोकः सात्त्विकप्रकाशप्रसरस्तस्य निखिलेषु विषयेषु न्यासा
त्तद्वासितानां विषयाणां भावनात्संतःकरणेषु इंद्रियेषु प्रकृष्टशक्तिमापन्नेषु सूक्ष्मस्य परमाण्वा
देर्व्यवहितस्य भूम्यंतर्गतस्य निधानादेर्विप्रकृष्टस्य मेरुपरपार्श्ववर्त्तिनो रसायनादेर्ज्ञानमुत्प
द्यते॥२६॥ एतत्समानवृत्तांतं सिद्ध्यंतरमाह॥ ॥भुवनज्ञानं सूर्यसंयमात्॥२७॥ ॥सूर्ये प्रकाश
मये संयमं करोति तस्य सप्तसु भूर्भुवःस्वःप्रभृतिषु लोकेषु यानि भुवनानि तत्सन्निवेशभांजि
पुराणि तेषु यथावदस्य ज्ञानमुत्पद्यते॥ पूर्वस्मिन्सूत्रे सात्त्विकप्रकाश आलंबनतयोक्तः॥ इह तु
भौतिक इति विशेषः॥२७॥ भौतिकप्रकाशालंबनद्वारेणैव सिद्ध्यंतरमाह॥ ॥चंद्रे ताराव्यूहज्ञा
नं॥२८॥ ॥ताराणां ज्योतिषां यो व्यूहः विशिष्टः सन्निवेशस्तस्मिन् चंद्रे कृतसंयमस्य ज्ञानमुत्प
द्यते॥ सूर्यप्रकाशेन हततेजस्कत्वात्ताराणां सूर्यसंयमात्तज्ज्ञानं न शक्नोति भवितुमिति पृथग
यमुपायो निर्दिष्टः॥२८॥ सिद्ध्यंतरमाह॥ ॥ध्रुवे तद्गतिज्ञानं॥२९॥ ॥ध्रुवे निश्चले ज्योतिषां प्र ॥२५॥

धाने कृतसंयमस्य ताराणां या गतिः प्रत्येकं नियतकाला नियतदेशा च तस्या ज्ञानमुत्पद्यते॥ इयं ता
रा इयं च ग्रह इयता कालेनामुं राशिमिदं नक्षत्रं यास्यतीति सर्वं जानातीत्यर्थः॥ इदं कालज्ञानमस्य फलमि
त्युक्तं भवति॥२९॥ बाह्याः सिद्धीः प्रतिपाद्यांतराः प्रतिपादयितुमाह॥ ॥नाभिचक्रे कायव्यूहज्ञानं॥३०॥
शरीरमध्यवर्त्ति नाभिसंज्ञकं यत्षोडशारचक्रं तस्मिन् कृतसंयमस्य योगिनः कायगतो यो सौ व्यूहो वि
शिष्टरसमलधातुनाड्यादीनामवस्थानं तत्र ज्ञानमुत्पद्यते॥ इदमुक्तं भवति॥ नाभिचक्रं शरीरमध्य
वर्त्ति सर्वतः प्रसृतानां नाड्यादीनां मूलभूतमतस्तत्र कृतावधानस्य समग्रसन्निवेशो यथावद्भाति॥३०॥
सिद्ध्यंतरमाह॥ ॥कंठकूपे क्षुत्पिपासानिवृत्तिः॥३१॥ ॥कंठे गले कूपः जिह्वामूले जिह्वातो धस्ता
त्कूप इव कूपो गर्त्ताकारः प्रदेशः प्राणादेर्यत्संस्पर्शात् क्षुत्पिपासादयः प्रादुर्भवंति॥ तस्मिन् कृत
संयमस्य योगिनः क्षुत्पिपासादयो निवर्त्तंते॥ घंटिकाधस्तात्स्रोतसा धार्यमाणे तस्मिन् भाविते भ
वत्येवंविधा सिद्धिः॥३१॥ सिद्ध्यंतरमाह॥ ॥कूर्मनाड्यां स्थैर्यं॥३२॥ ॥कंठकूपस्याधस्तान्हृदठा कूर्मा
ख्या नाडी तस्यां कृतसंयमस्य चेतसः स्थैर्यमुत्पद्यते॥ तत्स्थानमनुप्रविष्टस्य चंचलता न भवतीत्य
र्थः॥ यद्वा कायस्य स्थैर्यमुत्पद्यते॥ न केनचित्स्पंदयितुं शक्यत इत्यर्थः॥३२॥ सिद्ध्यंतरमाह॥ ॥मू
र्द्धज्योतिषि सिद्धदर्शनं॥३३॥ ॥शिरःकपाले ब्रह्मरंध्राख्यं छिद्रं प्रकाशाधारत्वाज्ज्योतिः यथा गृहा
भ्यंतरस्थमणेः प्रसरंती प्रभा कुंचिकाविवरप्रदेशे संहते घत्ते तथा हृदयस्थः सात्त्विकः प्रकाशः प्रसृ

ततस्तत्र संपिंडितत्वं भजते॥ तत्र कृतसंयमस्य ये द्यावापृथिव्योरंतरालवर्त्तिनः सिद्धाः दिव्याः पुरुषास्ते
षामितरप्राणिभिरदृश्यानां तस्य दर्शनं भवति॥ तान्स पश्यति तैश्च सह संभाषत इत्यर्थः॥३३॥ स
र्वज्ञत्वे उपायांतरमाह॥ ॥प्रातिभाद्वा सर्वं निमित्तानपेक्षं॥३४॥ मनोमात्रजन्यमविसंवादकं झगि
त्युत्पद्यमानं ज्ञानं प्रातिभं तस्मिन्संयमे क्रियमाणे प्रातिभं विवेकख्यातेः पूर्वभावि तारकं ज्ञानमुदेति॥
यथोदेष्यति सवितरि पूर्वं प्रभा प्रादुर्भवति॥ तद्वद्विवेकख्यातेः पूर्वं तारकं सर्वविषयं ज्ञानमावि
र्भवति॥ तस्मिन्सति संयमांतरानपेक्षः सर्वं जानातीत्यर्थः॥३४॥ सिद्ध्यंतरमाह॥ ॥हृदये चित्तसंवि
त्॥३५॥ ॥हृदयं शरीरप्रदेशविशेषः॥ तस्मिन्नधोमुखस्वल्पहृत्पुंडरीकाभ्यंतरेंऽतःकरणसत्त्व
स्य स्थानं तत्र कृतसंयमस्य परचित्तज्ञानमुत्पद्यते॥ स्वचित्तगताः सर्वा वासनाः परचित्तगतांश्च
रागादीन्जानातीत्यर्थः॥३५॥ सिद्ध्यंतरमाह॥ ॥सत्त्वपुरुषयोरत्यंतासंकीर्णयोः प्रत्ययाविशेषो
भोगः परार्थात्स्वार्थसंयमात्पुरुषज्ञानं॥३६॥ ॥सत्त्वं प्रकाशसुखात्मकं प्राधानिकः परिणाम
विशेषः॥ पुरुषो भोक्ताधिष्ठानरूपः॥ तयोर्भोग्यभोक्तृरूपत्वाच्चेतनाचेतनत्वाच्चात्यंतासंकीर्णत्वं
भिन्नत्वमित्यर्थः॥ तयोर्यः प्रत्ययस्याविशेषोऽभेदेन प्रतिभासनं तस्मात्सत्त्वस्यैव कर्तृताप्रत्यये
नया सुखदुःखसंविद्भोगः सत्त्वस्य स्वार्थनैरपेक्ष्येण परार्थः पुरुषार्थनिमित्तः॥ तस्मादन्यो यः
स्वार्थः पुरुषस्वरूपमात्रालंबनः परित्यक्ताहंकारः सत्त्वे या चिच्छायासंक्रांतिस्तत्र कृतसंयमस्य ॥२९॥

स्वा

पुरुषविषयं यत्तज्ज्ञानमुत्पद्यते॥ तदेवंरूपं स्वालंबनं ज्ञानं सत्त्वनिष्ठः पुरुषो जानाति॥ न पुनः पुरुषो ज्ञा
ता ज्ञानस्य विषयभावमापद्यते ज्ञेयत्वापत्तेः॥ ज्ञातृज्ञेययोश्चात्यंतविरोधात्॥ अस्यैव संयमस्य फ
लमाह॥ ॥ततः प्रातिभश्रावणवेदनादर्शास्वादवार्त्ता जायंते॥३७॥ ॥ततः पुरुषसंयमादभ्यस्य
मानाद्व्युत्थितस्यापि ज्ञानानि जायंते॥ तत्र प्रातिभं पूर्वोक्तं ज्ञानं तस्याविर्भावात्सूक्ष्मादिकमर्थं पश्य
ति॥ श्रावणं श्रोत्रेंद्रियजं ज्ञानं तस्माच्च प्रकृष्टाद्दिव्यं दिवि भवं शब्दं जानाति॥ वेदना स्पर्शेंद्रियजं ज्ञा
नं॥ वेद्यतेऽनयेति कृत्वा तांत्रिक्या संज्ञया व्यवह्रियते॥ तस्माद्दिव्यस्पर्शविषयं ज्ञानमुत्पद्यते॥ आद
र्शश्चक्षुरिंद्रियजं ज्ञानं॥ आ समंताद्दृश्यते ज्ञायते रूपमनेनेति कृत्वा तस्य प्रकर्षाद्दिव्यरूपज्ञानमुत्प
द्यते॥ आस्वादो रसनेंद्रियज्ञानं॥ आस्वाद्यतेऽनेनेति कृत्वा तस्मिन्प्रकृष्टे दिव्ये रसे संविदुपजायते॥ वार्त्ता
गंधसंवित्तिः॥ वृत्तिशब्देन तांत्रिक्या परिभाषया घ्राणेंद्रियमुच्यते॥ वर्त्तते गंधविषय इति कृत्वा व
र्त्तते घ्राणेंद्रियाज्जाता वार्त्ता गंधसंवित्तिः॥ तस्यां प्रकृष्यमाणायां दिव्यो गंधोऽनुभूयते॥३७॥ एषां फल
विशेषाणां विषयविभागमाह॥ ॥ते समाधावुपसर्गा व्युत्थाने सिद्धयः॥३८॥ ते प्राक्प्रतिपादिताः
फलविशेषाः समाधेः प्रकर्षं गच्छत उपसर्गा उपद्रवा विघ्नकारिणः॥ तत्र हर्षविस्मयादिकरणे
न समाधिः शिथिलीभवति॥ व्युत्थाने तु व्यवहारदशायां विशिष्टफलदायकत्वात्सिद्धयो भवंति॥३८॥
सिद्ध्यंतरमाह॥ ॥बंधकारणशैथिल्यात्प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः॥३९॥ ॥व्याप

॥पा॰सू॰वृ॰॥ कत्वादात्मचित्तयोर्नियतकर्मवशादेव शरीरांतर्गतयोरेव भोक्तृभोग्यभावेन यत्संवेदनमुपजायते स ए
॥२७॥ व शरीरे बंध इत्युच्यते ॥ तद्यदा समाधिवशाद्बंधकारणं धर्माधर्माख्यं शिथिलं भवति ॥ तानवमापद्य
ते ॥ चित्तस्य योसौ प्रचारो हृदयप्रदेशादिंद्रियद्वारेण विषयाभिमुख्येन प्रसरस्तस्य संवेदनं ज्ञानं इयं
चित्तवहा नाडी अनया चित्तं वहति ॥ इयं च प्राणादिवहाभ्यो नाडीभ्यो विलक्षणा ॥ इति स्वपरशरीरयोर्य
दा संचारं जानाति तदा परकीयं शरीरं मृतं जीवच्छरीरं वा चित्तसंचारद्वारेण प्रविशति चित्तं च प
रशरीरे प्रविशदिंद्रियाण्यनुवर्त्तंते मधुकरराजमिव मधुमक्षिकाः ॥ ततः परशरीरप्रविष्टो योगी
स्वशरीरवत्तेन व्यवहरति ॥ यतो व्यापकयोश्चित्तपुरुषयोर्भोगसंकोचे कारणं कर्माभूत्तच्चेत्समा
धिना क्षिप्तं तदा स्वातंत्र्यात्सर्वत्रैव भोगनिष्पत्तिः ॥३९॥ सिद्ध्यंतरमाह ॥ ॥उदानजयाज्जलपंककं
टकादिष्वसंग उत्क्रांतिश्च ॥४०॥ ॥समस्तानामिंद्रियाणां तुषज्वालावद्या युगपदुत्थिता वृत्तिः सा जी
वनशब्दवाच्या तस्याः क्रियाभेदात्प्राणादिभिः संज्ञाभिर्व्यपदेशः ॥ तत्र हृदयान्मुखनासिकाद्वारे
ण वायोः प्रणयनात्प्राण इत्युच्यते ॥ नाभिप्रदेशात्पादांगुष्ठपर्यंतमपनयनादपानः ॥ नाभिप्र
देशं परिवेष्ट्य समंतान्नयनात्समानः ॥ कृकाटिकादेशादाशिरोवृत्तेरुन्नयनादुदानः ॥ व्याप्य नय
नात्सर्वव्यापी व्यानः ॥ उदानस्य संयमद्वारेण जयादितरेषां वायूनां निरोधादूर्ध्वगामित्वेन जलेन
द्यादौ महति वा कर्दमे तीक्ष्णेषु कंटकेषु वा न सज्जते ॥ अतिलघुत्वात् तूलपिंडवज्जलादौ मज्जि ॥२७॥

तोप्युत्क्रांतीत्यर्थः ॥४०॥ सिद्ध्यंतरमाह ॥ ॥समानजयाज्ज्वलनं ॥४१॥ ॥अग्निमावेष्ट्य व्यवस्थितस्य समान
वायोर्जयात्संयमेन वशीकरणान्निरावरणस्याग्नेरुद्भूतत्वात्तेजसा ज्वलन्निव योगी प्रतिभाति ॥४१॥ सिद्ध्यं
तरमाह ॥ ॥श्रोत्राकाशयोः संबंधसंयमाद्दिव्यं श्रोत्रं ॥४२॥ ॥श्रोत्रं शब्दग्राहकमाहंकारिकमिंद्रियं ॥ आ
काशं व्योम शब्दतन्मात्रकार्यं तयोः संबंधो देशदेशिभावलक्षणस्तस्मिन्कृतसंयमस्य योगिनो दिव्यं श्रो
त्रं प्रवर्त्तते ॥ युगपत्सूक्ष्मव्यवहितविप्रकृष्टशब्दग्रहणसमर्थं भवतीत्यर्थः ॥४२॥ सिद्ध्यंतरमाह ॥ काया
काशयोः संबंधसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनं ॥४३॥ ॥कायः पांचभौतिकं शरीरं तस्याका
शेनावकाशदायकेन यः संबंधः तत्र संयमं विधाय लघुनि तूलादौ समापत्तिं तन्मयीभावलक्षणां
च विधाय प्राप्तात्यंतलघुभावो योगी प्रथमं तु वि यथारुचि संचरन्क्रमेणोर्णनाभितंतुजालेन संच
रमाण आदित्यरश्मिभिश्च विहरन्यथेष्टमाकाशेन गच्छति ॥४३॥ सिद्ध्यंतरमाह ॥ ॥बहिरकल्पिता
वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः ॥४४॥ ॥शरीराद्बहिर्या मनसः शरीरनैरपेक्ष्येण वृत्तिः सा
महाविदेहा नाम विगतशरीराहंकारदार्ढ्यद्वारेणोच्यते ॥ ततस्तस्यां कृतसंयमात्प्रकाशावरणक्षयः
सात्विकस्य चित्तस्य यः प्रकाशस्तस्य यदावरणं क्लेशकर्मादि तस्य क्षयः प्रविलयो भवति ॥ अयमर्थः ॥
शरीराहंकारे सति या मनसो बहिर्वृत्तिः सा कल्पितेत्युच्यते ॥ यदा पुनः शरीराहंकारभावं परित्यज्य स्वा
तंत्र्येण मनसो वृत्तिः सा त्वकल्पिता तस्यां संयमाद्योगिनः सर्वे मलाः क्षीयंते ॥ तदेवं पूर्वांतविषयाः प
चित्त

॥पा॰सू॰वृ॰॥ रांतविषया मध्यमवाश्च चित्तसिद्धीः प्रतिपाद्यानंतरं भुवनज्ञानादिरूपा बाह्याः कायव्यूहादिरूपा आ
॥२८॥ भ्यंतराः परिकर्मनिष्पन्नरूपा मैत्र्यादिषु बलानीत्येवमाद्याः समाध्युपयोगिनीश्च ॥ अंतःकरणबहिः
करणलक्षणेंद्रियभवाः प्राणादिवायुभवाश्च सिद्धीश्चित्तदार्ढ्यीयसमाधेः समाश्वासोत्पत्तये प्रतिपा
द्येदानीं स्वदर्शनोपयोगिसबीजनिर्बीजसमाधिसिद्धये विविधोपायप्रदर्शनायाह ॥ ॥स्थूलस्वरू
पसूक्ष्मान्वयार्थवत्त्वसंयमाद्भूतजयः ॥४४॥ ॥पंचानां पृथिव्यादीनां भूतानां ये पंचावस्थाविशेषरू
पा धर्माः स्थूलत्वादयस्तत्र कृतसंयमस्य भूतजयो भवति ॥ भूतान्यस्य वश्यानि भवंतीत्यर्थः ॥ तथा
हि भूतानां परिदृश्यमानं विशिष्टाकारवत्स्थूलं रूपं ॥ स्वरूपं चैषां यथाक्रमं कार्कश्यस्नेहोष्णताप्रे
रणावकाशदानलक्षणं ॥ सूक्ष्मं च यथाक्रमं भूतानां कारणत्वेन व्यवस्थितानि तन्मात्राणि ॥ अन्व
यिनो गुणाः प्रकाशप्रवृत्तिस्थितिरूपतया सर्वत्रैवान्वयित्वेन समुपलभ्यंते ॥ अर्थवत्त्वं तेष्वेव
गुणेषु भोगापवर्गसंपादनाख्या शक्तिः ॥ तदेवं भूतेषु पंचसु उक्तधर्मलक्षणावस्थाभिन्नेषु प्रत्य
वस्थं संयमं कुर्वन्योगी भूतजयी भवति ॥ तद्यथा ॥ प्रथमं स्थूले रूपे संयमं विधाय तदनु स्वरूपे
इत्येवं क्रमेण तस्य कृतसंयमस्य संकल्पानुविधायिन्यो वत्सानुसारिण्य इव गावो भूतप्रकृतयो भ
वंति ॥४४॥ तस्यैव भूतजयस्य फलमाह ॥ ॥ततोणिमादिप्रादुर्भावः कायसंपत्तद्धर्मानभिघातश्च ॥४५॥
अणिमा परमाणुतापत्तिः ॥ महिमा महत्त्वं ॥ लघिमा तूलपिंडवल्लघुत्वप्राप्तिः ॥ गिरिमा गुरुत्वं ॥ ॥२८॥

प्राप्तिरंगुल्यग्रेण चंद्रादिस्पर्शनशक्तिः ॥ प्राकाम्यमिच्छानभिघातः ॥ शरीरांतःकरणेश्वरत्वमीशित्वं ॥
सर्वत्र प्रभविष्णुता ॥ वशित्वं सर्वाण्येव भूतान्यनुगामित्वात्तदुक्तं नातिक्रामंति ॥ यत्र कामावसायो य
स्मिन्विषयेस्य कामः इच्छा भवति तस्मिन्विषये योगिनो व्यवसायो भवति ॥ तं विषयं स्वीकारद्वारेणाभि
लाषसमाप्तिपर्यंतं नयतीत्यर्थः ॥ त एतेणिमाद्याः समाध्युपयोगिनो भूतजयाद्योगिनः प्रादुर्भवं
ति ॥ यथा परमाणुत्वप्राप्तेर्वज्रादिकानप्यंतः प्रविशति ॥ एवं सर्वत्र योज्यं ॥ त एतेणिमादयोष्टौ गुणा म
हासिद्धय इत्युच्यंते ॥ कायसंपद्वक्ष्यमाणलक्षणा तां प्राप्नोति ॥ तद्धर्मानभिघातश्च ॥ तस्य कायस्य ये धर्मा
रूपादयस्तेषामभिघातो नाशो नास्य कुतश्चिद्भवति ॥ नास्य रूपमग्निर्दहति न च वायुः शोषयतीत्या
दि योज्यं ॥४५॥ कायसंपदमाह ॥ ॥रूपलावण्यबलवज्रसंहननत्वानि कायसंपत् ॥४६॥ ॥रूपला न
वण्यबलानि प्रसिद्धानि वज्रसंहननत्वं वज्रवत्कठिना संहतिरस्य शरीरे भवतीत्यर्थः ॥ इति कायस्याभि
र्व्यक्तगुणसंपत् ॥४६॥ एवं भूतजयमभिधाय प्राप्तभूमिकस्येंद्रियजयमाह ॥ ॥ग्रहणस्वरूपास्मि
तान्वयार्थवत्त्वसंयमादिंद्रियजयः ॥४७॥ ॥ग्रहणमिंद्रियाणां विषयाभिमुखी वृत्तिः ॥ स्वरूपं सामा
न्येन प्रकाशकत्वं ॥ अस्मिता अहंकारानुगमः ॥ अन्वयार्थवत्त्वे पूर्ववत् ॥ एषामिंद्रियाणामवस्थापंचके पू ब
र्ववत्संयमं कृत्वेंद्रियजयी भवति ॥४७॥ तस्य फलमाह ॥ ॥ततो मनोजवित्वं विकरणभावः प्रधान
जयश्च ॥४८॥ ॥शरीरस्य मनोवदनुत्तमो गतिलाभो मनोजवित्वं ॥ कायनिरपेक्षाणामिंद्रियाणां वृत्ति

॥पा॰सू॰वृ॰॥ लाभो विकरणभावः ॥ सर्ववशित्वं प्रधानजयः ॥ एतांस्सिद्धयो जितेंद्रियस्य प्रादुर्भवंति ॥ ताश्चास्मि
॥२९॥ न्शास्त्रे मधुप्रतीका उच्यंते ॥ यथा मधुन एकदेशोपि स्वदते प्रत्येकमेवमेताः सिद्धयः स्वदंत इति
मधुप्रतीकाः ॥ ४९ ॥ इंद्रियजयमभिधायांतःकरणजयमाह ॥ ॥ सत्वपुरुषान्यताख्यातिमात्रस्य सर्वभा
वाधिष्ठातृत्वं सर्वज्ञातृत्वं च ॥ ५० ॥ ॥ तस्मिन्शुद्धे सात्विकपरिणामे कृतसंयमस्य या सत्वपुरुषयोरु
त्पद्यते विवेकख्यातिः ॥ गुणानां कर्तृत्वाभिमानशिथिलीभावरूपं तन्माहात्म्यात्तत्रैवावस्थितस्य
योगिनः सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च समाधिर्भवति ॥ सर्वेषां गुणपरिणामानां भावानां स्वामि
वदाक्रमणं सर्वभावाधिष्ठातृत्वं ॥ तेषामेव च शांतोदिताव्यपदेश्यधर्मित्वेनावस्थितानां यथावद्वि
वेकज्ञानं सर्वज्ञातृत्वं ॥ एषा चास्मिन्शास्त्रे परस्यां वशीकारसंज्ञायां प्राप्तायां विशोका नाम सिद्धिरुच्य
ते ॥ ५० ॥ क्रमेण भूमिकांतरमाह ॥ ॥ तद्वैराग्यादपि दोषबीजक्षये कैवल्यं ॥ ५१ ॥ ॥ एतस्यामपि वि
शोकायां सिद्धौ यदा वैराग्यमुत्पद्यते योगिनस्तदा तस्माद्दोषाणां रागादीनां यद्बीजमविद्यादयस्तस्य
क्षये निर्मूलत्वे कैवल्यं आत्यंतिकी दुःखनिवृत्तिः ॥ पुरुषस्य गुणानामधिकारपरिसमाप्तेः स्वरूपप्रति
ष्ठत्वं ॥ ५१ ॥ अस्मिन्नेव समाधौ स्थित्युपायमाह ॥ ॥ स्थान्युपनिमंत्रणे संगस्मयाकरणं पुनरनिष्ट
प्रसंगात् ॥ ५२ ॥ ॥ चत्वारो योगिनो भवंति ॥ तत्राभ्यासवान्प्रवृत्तमात्रज्योतिः प्रथमः ॥ ऋतंभरप्र
ज्ञो द्वितीयः ॥ भूतेंद्रियजयी तृतीयः ॥ अतिक्रांतभावनीयश्चतुर्थः ॥ तत्र चतुर्थस्य समाध्याविर्भू ॥२९॥

त सप्तविधप्रांतभूमिकस्यांत्यां मधुमतीसंज्ञां भूमिकां साक्षात्कुर्वतः स्थानिनो देवा उपनिमंत्रयितारो भ
वंति ॥ दिव्यस्त्रीरसायनादिकं ढौकयंतीति तस्मिन्नुपनिमंत्रणे नानेन संगः कर्तव्यो नापि स्मयः ॥ संग
करणे पुनर्विषयभोगे पतति ॥ स्मयकरणे कृतकृत्यमात्मानं मन्यमानो न समाधावुत्सहते ॥ अतः
संगस्मययोस्तेन वर्जनं कर्तव्यं ॥ ५२ ॥ अस्यामेव फलभूतायां विवेकख्यातौ पूर्वोक्तसंयमव्यतिरिक्त
मुपायांतरमाह ॥ ॥ क्षणतत्क्रमयोः संयमाद्विवेकजं ज्ञानं ॥ ५३ ॥ ॥ क्षणः सर्वांत्यः कालावयवः ॥ यस्य
कलाः प्रविभक्तुं न शक्यंते तथाविधानां कालक्षणानां यः क्रमः पौर्वापर्येण परिणामस्तत्र संयमात्प्रा
गुक्तं विवेकजं ज्ञानमुत्पद्यते ॥ अयमर्थः ॥ अयं कालक्षणोमुष्मात्कालक्षणादुत्तरोयमस्मात्पूर्व इत्येवं
विधक्रमे कृतसंयमस्यात्यंतसूक्ष्मेपि क्षणक्रमे यदा भवति साक्षात्कारस्तदान्यदपि सूक्ष्मं महदादि सा
क्षात्करोतीति विवेकज्ञानोत्पत्तिः ॥ ॥ अस्यैव संयमस्य विषयविवेकोपयोगमाह ॥ ॥ जातिलक्षणदेशैर
न्यतानवच्छेदात्तुल्ययोस्ततः प्रतिपत्तिः ॥ ५४ ॥ ॥ पदार्थानां भेदहेतवो जातिलक्षणदेशा भवंति ॥ क्वचि
द्भेदहेतुर्जातिः ॥ यथा गौरियं महिषीयमिति ॥ जात्या तुल्ययोर्लक्षणं भेदहेतुः इयं कर्बुरा इयमरुणेति ॥ जा
त्यालक्षणेन चाभिन्नयोर्भेदहेतुर्देशो दृष्टः ॥ यथा तुल्यपरिमाणयोरामलकयोर्भिन्नदेशावस्थितयोः ॥
यत्र पुनर्भेदोवधारयितुं न शक्यते ॥ यथैकदेशस्थितयोः शुक्लयोः पार्थिवयोः परमाण्वोः ॥ तथाविध
विषये भेदाय कृतसंयमस्य यदा भेदेन ज्ञानमुपजायते तदा तदभ्यासात्सूक्ष्माण्यपि तत्वानि भेदेन प्रति

२ततः

॥पा॰सू॰वृ॰॥ पद्यंते॥ एतदुक्तं भवति॥ यत्र केनचिदुपायेन भेदो नावधारयितुं शक्यस्तत्र संयमाद्भवत्येव भेदप्रतिप
॥३०॥ त्तिः॥५४॥ सूक्ष्माणां तत्त्वानामुक्तस्य विवेकजन्यज्ञानस्य संज्ञाविषयं स्वभावं व्याख्यातुमाह॥ ॥तारकं सर्व
विषयं सर्वथाविषयमक्रमं चेति विवेकजं ज्ञानं॥५५॥ ॥उक्तसंयमबलादंत्यायां भूमिकायामुत्पन्नं
ज्ञानं तारयत्यगाधात्संसारसागराद्योगिनमित्यन्वर्थिकया संज्ञया तारकमित्युच्यते॥ अस्य विषयमा
ह॥ सर्वविषयमिति॥ सर्वाणि तत्त्वानि महदादीनि विषयो यस्येति सर्वविषयं॥ सर्वाभिरवस्थाभिः स्थू
लस्वरूपसूक्ष्मादिभेदेन तैस्तैः परिणामैः सर्वेण प्रकारेणावस्थितानि तत्त्वानि विषयो यस्येति सर्वथा
विषयं॥ स्वभावान्तरमाह॥ अक्रमं चेति॥ निःशेषनानावस्थापरिणामद्रव्याधिकभावग्रहणे नास्य
क्रमो विद्यत इत्यक्रमं॥ सर्वं करतलामलकवद्युगपत्पश्यतीत्यर्थः॥५५॥ अस्माच्च विवेकजात्तारका
ख्यात्ज्ञानात्किं भवतीत्याह॥ ॥सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यं॥५६॥ ॥सत्त्वपुरुषावुक्तलक्षणौ
तयोः शुद्धिसाम्ये कैवल्यं॥ साम्यं सत्त्वस्य सर्वकर्तृत्वाभिमाननिवृत्त्या स्वकारणेनुप्रवेशः॥ शुद्धिः पु
रुषस्य शुद्धिरूपचरितभोगाभाव इति द्वयोः समानायां शुद्धौ पुरुषस्य कैवल्यमुत्पद्यते॥ मोक्षो भ
वतीत्यर्थः॥५६॥ तदेवमंतरंगं योगांगत्रयमभिधाय तस्य च संयमसंज्ञां कृत्वा संयमस्य च विषय
प्रदर्शनार्थं परिणामत्रयमुपपाद्य संयमबलोत्पद्यमानाः पूर्वांतपरांतमध्यभवाः सिद्धीरुपदर्श्य
समाध्याश्वासोत्पत्तये बाह्यभुवनज्ञानादिरूपा आभ्यंतराश्च व्यूहज्ञानादिरूपाः प्रदर्श्य समाध्यु ॥३०॥

पयोगाय इंद्रियप्राणजयादिपूर्विकाः प्रदर्श्य परमपुरुषार्थसिद्धये यथाक्रममवस्थासहितं भूतजयं
सत्त्वजयोद्भवाश्चाख्याय विवेकज्ञानोत्पत्तये तांस्तानुपायानुपन्यस्य तारकस्य सर्वसमाध्यवस्था
पर्यंतभवस्य स्वरूपमभिधाय तत्समापत्तेहृताधिकारस्य चित्तसत्त्वस्य स्वकारणेनुप्रवेशात्कैवल्य
मुत्पद्यत इत्यभिहितमिति निर्णीतो विभूतिपादः॥ ॥इति श्रीराजाधिराजभोजदेवविरचिता
यां राजमार्तंडाभिधायां पातंजलयोगशास्त्रवृत्तौ विभूतिपादस्तृतीयः॥३॥ ॥ॐ॥ ॥यदाज्ञयै
भज वकैवल्यं विनोपायं प्रजायते॥ तमेकमीशानं चिदानंदमयं स्तुमः॥१॥ ॥इदानीं विप्रतिपत्तिसमु
स्या त्थभ्रांतिनिराकरणेन सुखं कैवल्यस्वरूपज्ञापनाय कैवल्यपादोयमारभ्यते॥ तत्र याः पूर्वमुक्ताः सि
द्धयस्तासां नानाविधजन्मादिकारणप्रतिपादनद्वारेणैवं बोधयंति॥ यद्धिया एताः सिद्धयस्तास्सर्वाः
वशा पूर्वजन्माभ्यस्तसमाधिबलाज्जन्मादिनिमित्तमात्रत्वेनाश्रित्य प्रवर्तंते॥ तत्रश्चानेकभवसाधन
साध्यस्य समाधेर्न क्षतिरस्तीत्याश्वासोत्पादनाय समाधिसिद्धेश्च प्राधान्यख्यापनार्थं कैवल्योत्पा
दनार्थं चाह॥ ॥जन्मौषधिमंत्रतपःसमाधिजाः सिद्धयः॥१॥ ॥काश्चन जन्मनिमित्ता एव सिद्धयः॥
यथा पक्ष्यादीनामाकाशगमनादयः॥ यथा वा कपिलमहर्षिप्रभृतीनां जन्मसमनंतरमेवोपजा
यमाना ज्ञानादयः सांसिद्धिका गुणाः॥ औषधिसिद्धयो यथा पारदादौ रसायनाद्युपयोगात्॥ मं
त्रसिद्धिर्यथा केषांचिदाकाशगमनादि॥ तपःसिद्धिर्यथा विश्वामित्रादीनां॥ समाधिसिद्धिर्यथा प्रा

१ मंत्रजपात्

कृप्रतिपादिता॥ एताः सिद्धयः पूर्वजन्मनि क्षपितक्लेशस्य प्राणिनामेवोपजायंते। तस्मात्समाधिसिद्धादि
वान्यासां सिद्धीनां समाधिरेव जन्मांतराभ्यस्तः कारणं॥ मंत्रादीनि तु निमित्तमात्राणि॥ ननु नंदीश्वरा
दीनां जात्यादिपरिणामोऽस्मिन्नेव जन्मनि दृश्यते तत्कथं जन्मांतराभ्यस्तस्य समाधेः कारणत्वमुच्य स्त॰
त इत्याशंक्याह॥ ॥जात्यंतरपरिणामः प्रकृत्यापूरात्॥२॥ ॥योयमिहैव जन्मनि नंदीश्वरादीनां
जात्यादिपरिणामः स प्रकृत्यापूरात् पाश्चात्या एव हि प्रकृतयोऽमुष्मिन् जन्मनि विकारानापू
रयंति जात्यंतराकारेण परिणमंति॥२॥ ननु च धर्मादयस्तत्र क्रियमाणा उपलभ्यंते तत्कथं प्रकृती
नामापूरणे कारणमित्याह॥ ॥निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत्॥३॥
निमित्तं धर्माधर्मादि॥ तत्प्रकृतीनामर्थांतरपरिणामेन प्रयोजकं॥ न हि कार्येण कारणं प्रवर्त्यते॥
नस्य कुत्र तर्हि धर्मादेर्व्यापार इत्याह॥ वरणभेदस्तु ततः क्षेत्रिकवत्॥ ततस्तस्मादनुष्ठीयमानाद्धर्मा
देर्यद्वरणमावरणकमधर्मादि॥ तस्यैव विरोधित्वात् भेदः क्षयः क्रियते॥ तस्मिन्प्रतिबंधके
क्षीणे प्रकृतयः स्वयमभिमतकार्याय प्रभवंति॥ दृष्टांतमाह॥ क्षेत्रिकवत्॥ यथा क्षेत्रिकः कृषी
वलः केदारात्केदारांतरं जलं निनीषुर्जलप्रतिबंधकावरणभेदमात्रं करोति॥ तस्मिन्भिन्ने ज
लं स्वयमेव प्रसरद्रूपं परिणामं गृह्णाति न तु जलप्रसरणे तस्य कश्चिद्व्यापारः॥ एवं धर्मादेर्बो प्रयत्नः
ध्यं॥ यदा साक्षात्कृततत्त्वस्य योगिनो युगपत्कर्मफलोपभोगायात्मीयनिरतिशयविभूत्यनुभ ॥३१॥

वाद्युगपदनेकशरीरनिर्मित्सोपजायते॥ तदा कुतस्तानि चित्तानि प्रवर्तंत इत्याह॥ ॥निर्माणचित्ता
न्यस्मितामात्रात्॥४॥ ॥योगिनः स्वयं निर्मितेषु कायेषु यानि चित्तानि तानि मूलकारणादस्मितामात्रा
देव तदिच्छया प्रसरंति॥ अग्नेर्विस्फुलिंगा इव युगपत्परिणमंति॥४॥ ननु बहूनां चित्तानां भिन्नाभिप्राय
त्वान्नैककार्यकर्तृत्वं स्यादित्यत आह॥ ॥प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषां॥५॥ ॥अनेकेषां चेत
सां प्रवृत्तिभेदे व्यापारनानात्वे एकं योगिनश्चित्तं प्रयोजकं प्रेरकं अधिष्ठातृत्वेन तेन न भिन्नमतत्वं॥
त्मी अयमर्थः॥ यथास्वीयशरीरे मनश्चक्षुःपाण्यादीनि यथेच्छं प्रेरयत्यधिष्ठातृत्वेन तथा कायांतरेष्व
पीति॥ जन्मादिप्रभवत्वात्सिद्धीनां चित्तमपि तत्प्रभवं पंचविधमेवातो जन्मादिप्रभवाच्चित्तात्समाधि
प्रभवस्य वैलक्षण्यमाह॥ ॥तत्र ध्यानजमनाशयं॥६॥ ॥ध्यानजं समाधिजं यच्चित्तं तत्पंचसु मध्येऽना
शयं कर्मवासनारहितमित्यर्थः॥६॥ यथेतरचित्तेभ्यो योगिनश्चित्तं क्लेशादिरहितं विलक्षणं तथा कर्मा
पि विलक्षणमित्याह॥ ॥कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषां॥७॥ ॥शुभफलदं कर्म यागादि शु
क्लं॥ अशुभफलदं ब्रह्महत्यादि कृष्णं॥ उभयसंकीर्णं शुक्लकृष्णं॥ तत्र शुक्लं कर्म विचक्षणानां दानत त
पःस्वाध्यायादिनियमवतां पुरुषाणां॥ कृष्णं कर्म नारकाणां॥ शुक्लकृष्णं मनुष्याणां॥ योगिनां तु संन्या
सवतामेवंविधं कर्म विलक्षणं यत्फलत्यागानुसंधानेनैवानुष्ठानान्न किंचित्फलमारभते॥७॥ अस्यै
व कर्मणः फलमाह॥ ॥ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानां॥८॥ ॥इह द्विविधाः कर्मवा

॥पा॰सू॰वृ॰॥ सनाः॥स्मृतिमात्रफलाः॥जात्यायुर्भोगफलाश्च॥तत्रजात्यायुर्भोगफलाएकानेकजन्मभवाइत्यनेनपूर्व
॥३२॥ मेवकृतनिर्णयाः॥याःस्मृतिमात्रफलास्तासुततःयेनकर्मणायादृक्शरीरमारब्धंदेवमनुष्यति
र्यगादिभेदेनतस्यविपाकस्ययाअनुगुणाअनुरूपावासनास्तासामेवतस्मादभिव्यक्तिर्वासनानांभ
वति॥अयमर्थः॥येनकर्मणापूर्वंदेवतादिशरीरमारब्धंजात्यंतरशतव्यवधानेनपुनस्तथावि
धस्यैवशरीरस्यारंभेतदनुरूपाएवस्मृतिफलावासनाःप्रकटीभवंति॥लोकांतरगतेष्वेवचार्थेषुत श
स्यस्मृत्यादयोजायंते॥इतरास्तुसत्योप्यनभिव्यक्तास्तिष्ठंति॥नतस्यांदशायांनरकादिशरीरोपभोग
वासनाव्यक्तिमायांति॥आसांवासनानांकार्यकरणानुपपत्तिमाशंक्यसमर्थयितुमाह॥जातिदेश
कालव्यवहितानामप्यानंतर्यंस्मृतिसंस्कारयोरेकरूपत्वात्॥९॥ ॥इहनानायोनिषुभ्रमतांसंसारि
णांकांचिद्योनिमनुभूययदायोन्यंतरसहस्रव्यवधानेनपुनस्तामेवयोनिंप्रतिपद्यंते॥तदातस्यांपूर्वा
दि नुभूतायांयोनौतथाविधशरीरव्यंजकापेक्षयावासनायाःप्रकटीभूताआसन्तास्तथाविधव्यंज
काभावात्तिरोहिताःपुनस्तथाविधव्यंजकशरीरादिलाभेप्रकटीभवंति॥जातिदेशकालव्यवधा
नेपितासांस्वानुरूपस्मृत्यादिफलसाधनेआनंतर्यंनैरंतर्यमेव॥कुतःस्मृतिसंस्कारयोरेकरूप
त्वात्॥तथाहि॥अनुष्ठीयमानात्कर्मणश्चित्तसत्वेनवासनारूपःसंस्कारःसमुत्पद्यते॥सचस्वर्ग
नरकादीनांफलानामंकुरीभावःकर्मणांवायागादीनांशक्तिरूपतयावस्थानंकर्तुर्वातथाविधभो ॥३२॥

गभोक्तृत्वरूपंसामर्थ्यं॥संस्कारात्स्मृतिःस्मृतेश्चसुखदुःखभोगस्तदनुभवाच्चपुनरपिसंस्कारस्मृत्याद
यः॥एवंचयस्तियस्यस्मृतिसंस्कारादयोभिन्नास्तस्यानंतर्याभावेदुर्लभःकार्यकारणभावः॥अस्माकंतु
यदानुभवएवसंस्कारीभवति॥संस्कारश्चस्मृतिरूपतयापरिणमते॥तदेकस्यैवचित्तस्यानुसंधा
तृत्वेनान्वितत्वात्कार्यकरणभावोनदुर्घटः॥भवत्वानंतर्यंकार्यकरणभावश्चवासनानां॥यदातु
प्रथममेवानुभवःप्रवर्त्ततेतदाकिंवासनानिमित्तकउतनिर्निमित्तकइतिशंकामपनेतुमाह॥ ॥
तासामनादित्वंचाशिषोनित्यत्वात्॥१०॥ ॥तासांवासनानामनादित्वंनविद्यतेआदिर्यस्यतस्यभा
वस्तत्त्वं॥यासामादिर्नास्तीत्यर्थः॥कुतइत्यतआह॥आशिषोनित्यत्वात्॥येयमाशीर्महामोहरूपास
देवसुखसाधनानिमेभूयासुर्माकदाचनतैर्वियोगोमेभूयादितियःसंकल्पविशेषोवासनानां
कारणंतस्यनित्यत्वादनादित्वमित्यर्थः॥एतदुक्तंभवति॥कारणस्यसन्निहितत्वादनुभवसंस्कारा
दीनांकार्याणांप्रवृत्तिःकेनवार्यते॥अनुभवसंस्काराद्यनुविद्धंसंकोचविकोशधर्मिचित्तंतत्तदभि
व्यंजकविपाकलाभात्तत्तत्फलरूपतयापरिणमतइत्यर्थः॥१०॥आसामानंत्याद्धानंकथंसंभव
तीत्याशंक्यहानोपायमाह॥ ॥हेतुफलाश्रयालंबनैःसंगृहीतत्वादेषामभावेतदभावः॥११॥ ॥
वासनानामनंतरानुभवोहेतुस्तस्याप्यनुभवस्यरागादयस्तेषामविद्येतिसाक्षात्पारंपर्येणचहेतुः॥
फलंशरीरादिस्मृत्यादयश्च॥आश्रयोबुद्धिसत्वं॥आलंबनंयदेवानुभवस्यतदेववासनानाम

॥पा·स्र·वृ·॥ नस्तैर्हेतुफलाश्रयालंबनैरनंतानामपि वासनानां संगृहीतत्वात्तेषां हेत्वादीनामभावे ज्ञानयोगा
॥३३॥ भ्यां दग्धबीजकल्पत्वे विहिते निर्मूलत्वाच्च वासना न प्ररोहंति न कार्यमारभंते इति तासामभा
वः॥ ननु प्रतिक्षणं चित्तस्य विनश्वरत्वात्तरतमत्वोपलब्धेर्वासनानां तत्फलानां च कार्यकारण
भावेन युगपदभावित्वात् भेदे कथमेकत्वमित्याशंक्य एकत्वसमर्थनायाह॥ ॥अतीतानागतं स्व
रूपं नास्त्यध्वभेदात्तद्धर्माणां॥१२॥ इहात्यंतमसतां भावानामुत्पत्तिर्न युक्तिमती तेषां सत्त्वसंबंधा
योगात्॥ न हि शशविषाणादीनां क्वचिदपि सत्त्वसंबंधो दृष्टः॥ निरूपाख्ये च कार्ये किमुद्दिश्य कार
णानि प्रवर्तेरन्॥ न हि विषयमनालोच्य कश्चित्प्रवर्तते॥ सतामपि विरोधान्नाभावसंबंधोस्ति॥
यत्स्वरूपेण लब्धसत्ताकं तत्कथं निरूपाख्यतामभावस्वरूपतां भजते॥ न विरुद्धं रूपं स्वीकरोतीत्य
र्थः॥ तस्मात्सतां नाशासंभवादसतां चोत्पत्त्यसंभवात्तैस्तैर्धर्मैर्विपरिणममानो धर्मी सदैकरूपतया
वतिष्ठते॥ धर्मास्तु औपाधिकत्वेन त्रैकालिकत्वेन व्यवस्थिताः स्वस्मिन्स्वस्मिन्नध्वनि व्यवस्थिता न
स्वरूपं त्यजंति॥ वर्तमानेध्वनि व्यवस्थिताः केवलं भोग्यतां भजंते॥ तस्माद्धर्माणामेवातीतानागता
ध्वभेदः॥ तेनैव च रूपेण कार्यकारणभावोस्मिन्दर्शने प्रतिपाद्यते॥ तस्मादपवर्गपर्यंतमेकमेव चि
त्तं धर्मितयानुवर्तमानं न निह्नोतुं पार्यते॥१२॥ त एते धर्मधर्मिणः किंरूपा इत्यत आह॥ ॥ते व्यक्त
सूक्ष्मा गुणात्मानः॥१३॥ ॥य एते धर्मधर्मिणः प्रोक्तास्ते व्यक्तसूक्ष्मभेदेन व्यवस्थिता गुणाः सत्त्वर ॥३३॥

जस्तमोरूपास्तदात्मानस्तत्स्वभावास्तत्परिणामरूपा इत्यर्थः॥ यतः सत्त्वरजस्तमोभिः सुखदुःखमोहरू
पैः सर्वासां बाह्याभ्यंतरभेदभिन्नानां भावव्यक्तीनामन्वयानुगमो दृश्यते॥ यच्च यदन्वयि तत्तत्परिणाम न्वितं
रूपं दृष्टं॥ यथा घटादयो मृदन्विता मृत्परिणामरूपाः॥१३॥ यद्येते त्रयो गुणाः सर्वत्र मूलकारणं कथमे
को धर्मीति व्यपदेश इत्याशंक्याह॥ ॥परिणामैकत्वाद्वस्तुतत्त्वं॥१४॥ ॥यद्यपि त्रयो गुणास्तथापि तेषा
मंगांगिभावलक्षणो यः परिणामः क्वचित्सत्त्वमंगि क्वचिद्रजः क्वचित्तम इत्येवंरूपस्तस्यैकत्वाद्वस्तुनस्त
त्त्वमेकत्वमुच्यते॥ यथा इयं पृथिवी अयं वायुरित्यादि॥१४॥ ननु च ज्ञानव्यतिरिक्ते सत्यर्थे वस्त्वेकम
व नेकं वा वक्तुं युज्यते यदा विज्ञानमेव वासनावशात्कार्यकारणभावेनावस्थितं तथा तथा प्रतिभाति तदा
कथमेतच्छक्यते वक्तुमित्याशंक्याह॥ ॥वस्तुसाम्ये चित्तभेदात्तयोर्विविक्तः पंथाः॥१५॥ ॥तयोर्ज्ञानार्थ
पंथा योर्विविक्तः विविधो मार्गो वेदनमिति यावत्॥ कथं वस्तुसाम्ये चित्तभेदात् समाने वस्तुनि स्त्र्यादावुपल
भ्यमाने नानाप्रमातॄणां चित्तस्य भेदः सुखदुःखमोहरूपतया समुपलभ्यते॥ तथाह्येकस्यां रूपलाव
ण्यवत्यां योषित्युपलभ्यमानायां सरागस्य सुखमुत्पद्यते॥ सपत्न्यास्तु द्वेषः॥ परिव्राजकादेर्घृणा इ
त्येकस्मिन्नपि वस्तुनि नानाविधचित्तोदयात्कथं चित्तकार्यत्वं वस्तुनः एकचित्तकार्यत्वे वस्त्वेकरूप चित्तैकार्थ
तयैवावभासेत॥ किंच चित्तकार्यत्वे वस्तुनो यदीयस्य चित्तस्य यद्वस्तु कार्यं तस्मिन्नर्थांतरव्यासक्ते चि
त्ते तद्वस्तु न किंचित्स्यात्॥ भवत्विति चेत् न तदेव कथमन्यैर्बहुभिरुपलभ्यते तस्मान्न चित्तकार्यं॥ अथ

६ भेदइति

॥पा·स्र·॥ युगपच्छ्रुतिः सोर्थः क्रियते तदा बहुनिर्निमित्तस्य तस्यार्थस्यैकनिर्मिताद्वैलक्षण्यं स्यात् ॥ यदि च वैल
॥३४॥ क्षण्यं नेष्यते तदाकारणभेदे सति कार्यभेदस्याभावे निर्हेतुकमेकरूपं वा जगत्स्यात् ॥ एतदुक्तं भवति ॥ स क
त्यपि भिन्ने कारणे यदि कार्यभेदस्तदा समग्रं जगन्नानाविधकारणजन्यमेकरूपं स्यात् कारणभेदा
ननुगमात्स्वातंत्र्येण निर्हेतुवादः स्यात् ॥ यद्येवं कथं तेन त्रिगुणात्मनार्थेनैकस्यैव प्रमातुः सुखदुःख
मोहमया त्रिज्ञानानि जन्यंते ॥ मैवं ॥ यथार्थस्त्रिगुणस्तथा चित्तमपि त्रिगुणं यस्य चार्थप्रतिभासोत्य
त्तौ धर्माधर्मादयः सहकारिकारणं तदुद्भवाभिभववशात्कदाचिच्चित्तस्य तेन तेन रूपेणाभिव्यक्तिः स
था च कामुकस्य सन्निहितायां योषिति धर्मसहकृतं चित्तं सत्त्वस्यांगितया परिणममानं सुखमयं
भवति ॥ तदेवा धर्मसहकारि रजसोंगितया दुःखरूपं सपत्नीमात्रस्य भवति ॥ तीव्राधर्मसहका
रितया तमसोंगित्वेन कोपनायाः सपत्न्या मोहमयं भवति ॥ तस्माद्विज्ञानव्यतिरिक्तोस्ति बाह्योर्थः ॥ आ
तदेवं विज्ञानवस्तुनोस्तादात्म्यविरोधान्न कार्यकारणभावः ॥ कारणभेदे सत्यपि कार्यभेदप्रसंगा
दिति ज्ञानाद्व्यतिरिक्तत्वमर्थस्य व्यवस्थापितं ॥ न चैकचित्ततंत्रं वस्तु तत्प्रमाणकं तदा किं स्यात् ॥ १५ ॥
यद्येवं ज्ञानं चेत्प्रकाशकत्वाद्ग्रहणस्वभावं स्वार्थश्च प्रकाश्यरूपत्वाद्ग्राह्यस्वभावस्तत्कथं युगपत्स
र्वानर्थान्न गृह्णाति न च स्मरतीत्याशंक्य परिहारं वक्तुमाह ॥ ॥ तदुपरागापेक्षित्वाच्चित्तस्य वस्तु
ज्ञाताज्ञातं ॥ १६ ॥ ॥ तस्यार्थस्योपरागादाकारसमर्पणाच्चित्ते बाह्यं वस्तु ज्ञातमज्ञातं च भवति ॥ स्व ॥३४॥

मर्थः ॥ नहि सर्वः पदार्थः आत्मलाभे ज्ञानसामग्रीमपेक्षते ॥ नीलादिज्ञानं चोपजायमानमिंद्रियप्रणा
लिकया समागतमर्थोपरागं सहकारिकारणत्वेनापेक्षते ॥ व्यतिरिक्तस्यार्थस्य संबंधाभावात् ग्रही
तुमशक्यत्वात् ॥ ततश्च येनैवार्थेनास्य ज्ञानस्य स्वस्वरूपोपरागः कृतस्तमेवार्थं तद्ज्ञानं व्यवहारयो
ग्यतां नयति ॥ ततश्च सोर्थो ज्ञात इत्युच्यते ॥ येनाकारेण न समर्पितः सोज्ञातत्वेन व्यवह्रियते ॥ यस्मिंश्चा
नुभूतेर्थे सदृशादिरर्थः संस्कारमुद्बोधयन् सहकारिकारणत्वं प्रतिपद्यते ॥ तस्मिन्नेवार्थे स्मृतिरुप
जायत इति न सर्वत्र ज्ञानं नापि सर्वत्राज्ञानं नापि सर्वत्र स्मृतिरिति न कश्चिद्विरोधः ॥ १६ ॥ यद्येवं प्रमा
तापि पुरुषो यस्मिन्काले नीलं संवेदयति न तस्मिन्नेव काले पीतमतश्चित्तवत्तस्यापि कादाचित्कत्वं
ग्रहीतृरूपत्वादाकारग्रहणे परिणामित्वं प्राप्तमित्याशंक्य परिहर्तुमाह ॥ ॥ सदा ज्ञाताश्चित्तवृत्तयस्त
त्प्रभोः पुरुषस्यापरिणामात् ॥ १७ ॥ ॥ या एताश्चित्तस्य प्रमाणविपर्ययादिरूपा वृत्तयस्तास्तत्प्रभो
स्तस्य चित्तस्य ग्रहीतुः पुरुषस्य सदा सर्वकालमेव ज्ञेयाः ॥ तस्य चिद्रूपतयाऽपरिणामात्परिणा
मित्वाभावादित्यर्थः ॥ यद्यसौ परिणामी स्यात्तदा परिणामस्य कादाचित्कत्वात्प्रमातुश्चित्तवृत्तीनां
सदा ज्ञातत्वं नोपपद्यते ॥ अयमर्थः ॥ पुरुषस्य चिद्रूपस्य सदैवाधिष्ठातृत्वेन व्यवस्थितस्य यदंत
रंगं ज्ञेयं निर्मलसत्त्वं तस्यापि सदैवावस्थितत्वात् येन येनार्थेनोपरक्तं भवति तथाविधस्य दृश्य
सञा स्य सदैव चिच्छायासंक्रांतिसंभवः ॥ तस्यां तस्यां सिद्धं सदा ज्ञातत्वमिति न कदाचित्परिणामित्वाशं

॥पा॰ सू॰ वृ॰॥ का॥१७॥ ननु चित्तमेव सर्वोत्कर्षाद्यदि प्रकाशकं तदा प्रकाशकत्वात् स्वपरप्रकाशकत्वादात्मानम
॥३५॥ र्थं च प्रकाशयतीति तावतैव व्यवहारसमाप्तेः कृतं ग्रहीत्रंतरेणेत्याशंकामपनेतुमाह॥ ॥न तत्स्वा
स्व भासं दृश्यत्वात्॥१८॥ ॥न चित्तं स्वाभासं प्रकाशवेद्यं न भवति॥ पुरुषेण वेद्यं भवतीति यावत्॥
कुतः॥ दृश्यत्वात्॥ यत्किल दृश्यं तद्द्रष्टृवेद्यं दृष्टं॥ यथा घटादि॥ वेद्यं च चित्तं तस्मान्न स्वाभासं॥१८॥
ननु च साध्याविशिष्टो हेतुः दृश्यत्वमेव चित्तस्यासिद्धं॥ किं च स्वबुद्धिसंवेदनद्वारेण पुरुषाणां हि
ताहितप्राप्तिपरिहाररूपा वृत्तयो दृश्यंते॥ तथा हि॥ क्रुद्धोहं भीतोहमत्र मे रागः इत्येवमाद्याः सं
विदो बुद्धेरसंवेदने नोपपद्यंत इत्याशंकां निरसितुमाह॥ ॥एकसमये चोभयानवधारणं॥१९॥
अर्थस्य संविदिदं तया व्यवहारयोग्यतापादनं॥ अयमर्थः॥ सुखहेतुर्दुःखहेतुर्वेति बुद्ध्यस्य संवि
दियमित्येवमाकारेण सुखदुःखरूपतया व्यवहारक्षमतापादनं॥ एवंविधं च व्यापारद्वयमर्थप्र
ख्यता कालेन युगपत्कर्तुं शक्यं विरोधात्॥ नहि विरुद्धयोर्व्यापारयोर्युगपत्संभवोस्ति॥ अत ए
कस्मिन्काले उभयस्य स्वरूपस्यार्थस्य चावधारयितुमशक्यत्वान्न चित्तं स्वप्रकाशकमित्युक्तं भ
यनिष्पाद्य वति॥ किं च एवंविधव्यापारद्वयो येनैस्य फलद्वयस्यासंवेदनाद्बहिर्मुखतयैवार्थनिष्ठत्वेन चित्त
स्य संवेदनादर्थनिष्ठमेव फलं न स्वनिष्ठमित्यर्थः॥१९॥ ननु मा भूद्बुद्धेः स्वयं ग्रहणं बुद्ध्यंतरेण वेद्य
तन तदा सापि बुद्धिः स्वयं बुद्ध्यंतरं प्रकाशयितुमसमर्थेति॥ तस्या ग्राहकं बुद्ध्यंतरं कल्पनीयं॥ तस्या ॥३५॥
न विष्यतीत्याशंक्याह॥ ॥चित्तांतरदृश्ये बुद्धिबुद्धेरतिप्रसंगः स्मृतिसंकरश्च॥२०॥ ॥यदि बुद्धिर्बुद्ध्यंतरेण

न्यदित्यनवस्थानात्पुरुषायुषेणाप्यर्थप्रतीतिर्न स्यात्॥ नहि प्रतीतावप्रतीतायामर्थः प्रतीतो भवति॥ स्मृ
तिसंकरश्च प्राप्नोति॥ रूपे रसे वा समुत्पन्नायां बुद्धौ तद्ग्राहिकाणामनंतानां बुद्धीनामुत्पत्तेः बुद्धिजनितैः
द्वाक्य संस्कारैर्यदा युगपद्बह्व्यः स्मृतयः क्रियंते तदा बुद्धेरपर्यवसानाद्बह्वीनां बुद्धिस्मृतीनां च बह्वीनां यु
गपदुत्पत्तेः कस्मिन्नर्थे स्मृतिरियमुत्पन्नेति ज्ञातुमशक्यत्वात् स्मृतीनां संकरः स्यात् इयं रूपस्मृतिरि
यं रसस्मृतिरिति न ज्ञायते॥२०॥ ननु च बुद्धेः स्वप्रकाशत्वाभावे बुद्ध्यंतरेण चासंवेदने कथमयं विषय
संवेदनरूपो व्यवहार इत्याशंक्य स्वसिद्धांतमाह॥ ॥चितेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसं
वेदनं॥२१॥ ॥पुरुषश्चिद्रूपत्वाच्चितिः॥ सा चाप्रतिसंक्रमा॥ न विद्यते प्रतिसंक्रमोन्यत्रगमनं यस्याः
सा तथोक्ता॥ अन्येनासंकीर्णेति यावत्॥ यथा गुणा अंगांगिभावलक्षणे परिणामे अंगिनं गुणमुपसं
क्रामंति॥ तद्रूपतामिवापद्यंते॥ यथा वा लोके परमाणवः प्रसरंतो विषयमारूप्यमायंति नैवं चिति
शक्तिस्तस्याः सर्वदैकरूपतया स्वप्रतिष्ठत्वेन व्यवस्थितत्वात्॥ अतस्तत्सन्निधाने यदा बुद्धिस्तदाका
रतामापद्यते चेतनेवोपजायते बुद्धिवृत्तिप्रतिसंक्रांता च यदा चिच्छक्तिः बुद्धिवृत्तिविशिष्टतया
संवेद्यते तदा बुद्धेः स्वस्यात्मनो वेदनं संभवतीत्यर्थः॥ इत्थं संविदितं चित्तं सर्वार्थग्रहणसामर्थ्ये
न सकलव्यवहारनिर्वाहक्षमं भवतीत्याह॥ ॥द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थं॥२२॥ ॥द्रष्टा पुरुषस्तेनो
परक्तं तत्सन्निधानेन तद्रूपतामिव प्राप्तं दृश्योपरक्तं गृहीतविषयाकारपरिणामं यदा भवति तदा त

॥पा·सू·र·॥ देवसर्वार्थग्रहणसमर्थंजायते॥यथानिर्मलंस्फटिकदर्पणाद्येवप्रतिबिंबग्रहणसमर्थंभवति
॥३९॥ ॥एवंरजस्तमोभ्यामनभिभूतंसत्त्वंशुद्धत्वाच्चिच्छायाग्रहणसमर्थंभवति॥नपुनरशुद्धत्वाद्रजस्तमसी॥
अतोन्यग्भूतरजस्तमोरूपमंगितयासत्त्वंनिर्मलदीपशिखाकारंसदैवएकरूपतयापरिणममा
नंचिच्छायाग्रहणसामर्थ्यादामोक्षप्राप्तेरवतिष्ठते॥यथायस्कांतसंनिधानेलोहस्यचलनमा
विर्भवति॥एवंचिद्रूपपुरुषसन्निधानेसत्त्वस्याभिव्यंग्यमभिव्यज्यतेचैतन्यं॥अतएवास्मिन्दर्श
नेद्वेचिच्छक्ती॥नित्योदिताभिव्यंग्याच॥नित्योदिताचिच्छक्तिःपुरुषस्तत्सन्निधानादभिव्यक्तमभि
व्यंग्यंचैतन्यंसत्त्वं॥अभिव्यंग्याचिच्छक्तिस्तदत्यंतसन्निहितत्वादंतरंगंपुरुषस्यभोग्यतांप्रतिपद्य
ते॥तदेवशांतब्रह्मवादिभिःसांख्यैःपुरुषस्यपरमात्मनोधिष्ठेयंकर्मात्मरूपंसुखदुःखभोक्तृ यदा
तयाव्यपदिश्यते॥यदत्यंतानुद्रिक्तत्वादेकस्यापिगुण स्यकदाचित्कस्यचिदंगित्वात्त्रिगुणंप्र
प्रकृतिलक्षणं तिक्षणंपरिणममानंसुखदुःखमोहात्मकमनिर्मलंतस्मिन्कर्मात्मरूपेस्थितेसत्त्वेस्वाकारसमर्पण
द्वारेणसंवेद्यतामापादयतितच्छुद्धंचित्तसत्त्वंएकतःप्रतिसंक्रांतचिच्छायमन्यतोगृहीतवि
षयाकारेणचित्तेनोपढौकितस्वाकारंचित्संक्रांतिबलाच्चेतनायमानंवास्तवचैतन्याभावेपिसुख
दुःखरूपभोगमनुभवति॥सएवभोगोत्यंतसान्निध्येनविवेकाग्रहणादभोक्तुरपिपुरुषस्यभो
गइतिव्यपदिश्यते॥अनेनैवाभिप्रायेणविंध्यवासिनोक्तं॥सत्त्वतप्तत्वमेवपुरुषस्यभोक्तृत्वमि ॥३९॥

ति॥अन्यत्रापिबिंबच्छायासदृश्यच्छायांतरोद्भवःप्रतिबिंबशब्देनोच्यते॥एवंसत्त्वेपिपौरुषेयचिद
यासदृशस्वकीयचिच्छायांतराभिव्यक्तिःप्रतिबिंबशब्दार्थः॥ननुप्रतिबिंबनंनामनिर्मलस्यनियत
परिणामस्यनिर्मलेदृष्टं॥यथामुखस्यदर्पणे॥अत्यंतनिर्मलस्यव्यापकस्यचपुरुषस्यतस्मादनि
र्मलेसत्त्वेकथंप्रतिबिंबनमुपपद्यते॥उच्यते॥प्रतिबिंबस्यस्वरूपमनवगच्छताभवतेदमभ्यधायि॥
यैवसत्त्वगतायाअभिव्यंग्यायाश्चिच्छक्तेःपुरुषस्यसान्निध्येभिव्यक्तिःसैवप्रतिबिंबनमुच्यते॥या
दृशीपुरुषगताचिच्छक्तिस्तच्छायातत्राप्याविर्भवतीति॥यदप्युक्तमत्यंतनिर्मलःपुरुषःकथम
निर्मलसत्त्वेप्रतिसंक्रामति॥तदप्यनैकांतिकंनैर्मल्यादपकृष्टेपिजलादावादित्यादयःप्रतिसंक्रां
ताःसमुपलभ्यंते॥यदप्युक्तमनवच्छिन्नस्यनास्तिप्रतिसंक्रांतिरितितदप्यनुपपन्नं॥व्यापकस्या
प्याकाशस्यदर्पणादौप्रतिसंक्रांतिदर्शनात्॥एवंसतिनकाचिदनुपपत्तिःप्रतिबिंबदर्शनस्य॥ कदा
ननुसात्त्विकपरिणामरूपेबुद्धिसत्त्वेपुरुषसन्निधानादभिव्यंग्यायाचिच्छक्तेःसाबाह्यार्थाकार
संक्रांतौपुरुषस्यसुखदुःखरूपोभोगइत्युक्तं॥तदनुपपन्नंतदेवचित्तसत्त्वंप्रकृतावपरिणता
यांकथंभवति॥किमर्थश्चतस्याःपरिणामः॥अथोच्यते॥पुरुषार्थोपभोगसंपादनंतयाकर्त्तव्यं॥
अतःपुरुषार्थकर्त्तव्यतयातस्यायुक्तएवपरिणामः॥तन्नोपपन्नं॥पुरुषार्थकर्त्तव्यतायाएवानु
पपत्तेः॥पुरुषार्थोमयाकर्त्तव्यइत्येवंविधोध्यवसायःपुरुषार्थकर्त्तव्यतोच्यते॥जडायाश्चप्र

॥पा॰सू॰वृ॰॥ कृतेः कथं प्रथममेवंविधोऽध्यवसायः॥ अस्ति चेदध्यवसायः कथं जडत्वं॥ अत्रोच्यते॥ अनुलोमप्र
॥३७॥ तिलोमलक्षणपरिणामद्वये सहजं शक्तिद्वयमस्ति॥ तदेव पुरुषार्थकर्तव्यतोच्यते॥ सा च अचेत
नायाअपि प्रकृतेः सहजैव॥ तत्र महदादिमहाभूतपर्यंतोऽस्या बहिर्मुखतयानुलोमपरिणामः॥
पुनः स्वकारणानुप्रवेशद्वारेणास्मितांतः प्रतिलोमः परिणामः॥ इत्थं च पुरुषस्याभोगपरिसमा
प्तेः सहजशक्तिद्वयक्षयात्कृतार्थी प्रकृतिर्न पुनः परिणाममारभते॥ एवंविधायां च पुरुषार्थक
र्तव्यतायां जडाया अपि प्रकृतेर्न काचिदनुपपत्तिः॥ ननु यदीदृशी शक्तिः सहजैव प्रधानस्या
स्ति तत्किमर्थं मोक्षार्थिभिर्मोक्षाय यत्नः क्रियते मोक्षस्यानर्थकत्वे तदुद्देशकशास्त्रस्याप्यानर्थ
क्यं॥ उच्यते॥ योयं प्रकृतिपुरुषयोरनादिर्भोक्तृभोग्यभावलक्षणः संबंधस्तस्मिन्सति व्यक्तचे
तनायाः प्रकृतेः कर्तृत्वाभिमानाद्दुःखानुभवे सति कथमियं दुःखनिवृत्तिरात्यंतिकी मम स्या
दिति भवत्येवाध्यवसायः॥ अतो दुःखनिवृत्त्युपायोपदेशकशास्त्रोपदेशापेक्षास्त्येव प्रधा
नस्य॥ तथाभूतमेव च कर्मानुरूपं बुद्धिसत्त्वे शास्त्रोपदेशस्य विषयः॥ दर्शनांतरेष्वप्येवंविध
एवाविद्यास्वभावः शास्त्रे निधीयते॥ स च मोक्षाय प्रयतमान एवंविधं शास्त्रोपदेशं सहकारि
णमपेक्ष्य मोक्षाख्यं फलमासादयति॥ सर्वाण्येव च कार्याणि प्राप्तायां सामग्र्यामात्मानं लभंते॥
अस्य च प्रतिलोमपरिणामद्वारेणात्माद्यस्य मोक्षस्य कार्यस्येदृश्येव सामग्री प्रमाणेन निश्चिता॥३७॥

प्रकारांतरेणानुपपत्तेः॥ अतस्तां विना कथं भवितुमर्हतीति॥ अतः स्थितमेतत्संक्रांतविषयोपरागमभिव्यक्त ग
चिच्छायं बुद्धिसत्त्वं विषयनिश्चयद्वारेण समग्रां लोकयात्रां निर्वाहयतीति॥ एवंविधमेव चित्तं पश्यंतो भ्रां
ताः स्वसंवेदनं चित्तं चित्तमात्रं च जगदित्येवं ब्रुवाणाः प्रतिबोधिता भवंति॥२२॥ ननु यद्येवंविधादेव चि
त्तात्सकलव्यवहारनिर्वृत्तिः कथं प्रमाणशून्यो द्रष्टाभ्युपगम्यत इत्याशंक्य द्रष्टरि प्रमाणमाह॥ ॥तदसं
ख्येयवासनाभिश्चित्रमपि परार्थं संहत्यकारित्वात्॥२३॥ ॥तदेव चित्तं संख्यातुमशक्याभिर्वासनाभि
श्चित्रमपि नानारूपमपि परार्थं परस्य स्वामिनो भोक्तुर्भोगापवर्गलक्षणमर्थं साधयतीति॥ कुतः संह
त्यकारित्वात्॥ संहत्य संभूय मिलित्वार्थक्रियाकारित्वात्॥ यच्च संहत्यार्थक्रियाकारि तत्परार्थं दृष्टं॥
यथा शयनासनादि॥ सत्त्वरजस्तमांसि च चित्तलक्षणपरिणामभांजि संहत्यकारीणि अतः परार्था
नि॥ यश्च परः स पुरुषः॥ ननु च यादृशेन शयनासनादीनां परेण शरीरवता पारार्थ्यमुपलब्धं तद्दृ
ष्टांतबलेन तादृश एव परः सिध्यति॥ यादृशश्च भवता परोऽसंहतरूपोऽभिप्रेतस्तद्विपरीतस्य सिद्धे
रयमनिष्टविषयको हेतुः॥ उच्यते॥ यद्यपि सामान्येन परार्थमात्रत्वेन व्याप्तिर्गृहीता तथापि सत्त्वादि
विलक्षणधर्मिपर्यालोचनया तद्विलक्षण एवासौ परः सिध्यति॥ यथा चंदनवति शिखरिणि विल
क्षणधूमाद्वह्निरनुमीयमान इतरवह्निविलक्षणश्चंदनप्रभवः प्रतीयते॥ एवमिहापि विलक्षण
स्य सत्त्वाख्यस्य भोग्यस्य पारार्थ्येऽनुमीयमाने तथाविध एकोऽसावधिष्ठाता परश्चिन्मात्ररूपोऽसंह

॥पा॰स्तु॰सू॰॥ तः सिध्यति॥ यद्यपि तस्य परतंत्त्वे सर्वेन्द्रियत्वमेव प्रतीयते तथापि नामसेभ्यो विषयेभ्यः प्रकृष्यते शरी
॥३८॥ रं प्रकाशरूपेंद्रियाश्रयत्वात्॥ तस्मादपि प्रकृष्यंते इंद्रियाणि तेभ्योपि प्रकृष्टं सत्त्वं प्रकाशरूपं तस्यापि
यः प्रकाशकः प्रकाश्यविलक्षणः स चिद्रूप एव नवनीतिकृतस्तस्य संदतत्त्वे॥२३॥ इदानीं शास्त्रफलं
कैवल्यं निर्णेतुं दशभिः सूत्रैरुपक्रमते॥ ॥विशेषदर्शिन आत्मभावभावनानिवृत्तिः॥२४॥ ॥एवं
सत्त्वपुरुषोरन्यत्वे साधिते यस्तयोर्विशेषं पश्यति॥ अहमस्मादन्य इत्येवंरूपं॥ तस्य ज्ञातचित्तस
त्त्वस्य चित्ते या आत्मभावभावना सा निवर्त्तते चित्तमेव कर्तृ ज्ञातृ भोक्तृ इत्यभिमानो निवर्त्तते॥२४॥
तस्मिन्सति किं भवतीत्याह॥ ॥तदा विवेकनिम्नं कैवल्यप्राग्भारं चित्तं॥२५॥ ॥यदस्याज्ञानपथनि
म्नं बहिर्मुखं विषयोपभोगफलं चित्तमासीत्तदिदानीं विवेकनिम्नं विवेकमार्गमंतर्मुखं कैवल्य
प्राग्भारं कैवल्यप्रभवं फलं कैवल्यप्राग्भारं भवास संपद्यत इति॥२५॥ अस्मिंश्च विवेकवाहिनि चित्ते येंतरायाः
प्रादुर्भवंति तेषां हेतुप्रतिपादनद्वारेण त्यागोपायमाह॥ ॥तच्छिद्रेषु प्रत्ययांतराणि संस्कारेभ्यः॥२६॥
तस्मिन्समाधौ स्थितस्य छिद्रेष्वंतरालेषु यानि प्रत्ययांतराणि व्युत्थानरूपाणि ज्ञानानि तानि प्राक्तने
भ्यो व्युत्थानानुभवजेभ्यः संस्कारेभ्यः अहं ममेत्येवंरूपाणि क्षीयमाणेभ्योपि प्रभवंति॥ अतः कारणो अंतःक
च्छित्तिद्वारेण तेषां हानं कर्त्तव्यमित्युक्तं भवति॥२६॥ हानोपायश्च पूर्वमेवोक्त इत्याह॥ ॥हानमेषां
क्लेशवदुक्तं॥२७॥ ॥यथा क्लेशानामविद्यादीनां हानं पूर्वमुक्तं तथा संस्काराणामपि कर्त्तव्यं॥ यथा ॥३८॥

ते ज्ञानाग्निना प्लुष्टाः दग्धबीजकल्पा न पुनश्चित्तभूमौ प्ररोहं लभंते॥ तथा संस्कारा अपि॥ एवं प्रत्ययां
तरानुदयेन स्थिरीभूते समाधौ यादृशस्य योगिनः समाधिप्रकर्षप्राप्तिर्भवति तथाविधमुपायमा
ह॥ ॥प्रसंख्यानेप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः॥२८॥ ॥प्रसंख्यानं याव
तां तत्त्वानां यथाक्रमं व्यवस्थितानां परस्परविलक्षणस्वरूपपरिभावनं तस्मिन्सत्यप्यकुसीद
स्य फलमलिप्सोः प्रत्ययांतराणामनुदये सर्वप्रकारविवेकख्यातेः परिशेषाद्धर्ममेघः समाधि
र्भवति॥ प्रकृष्टमशुक्लकृष्णं धर्मं परमपुरुषार्थसाधकं मेहति सिंचतीति धर्ममेघः॥ अनेन प्रकृष्टस्य
धर्मस्यैव ज्ञानहेतुत्वमित्युपपादितं भवति॥२८॥ तस्माद्धर्ममेघात्किं भवतीत्याह॥ ततः क्लेशकर्मनि
वृत्तिः॥२९॥ ॥क्लेशानामविद्यादीनामभिनिवेशांतानां कर्मणां च शुक्लादिभेदेन त्रिविधानां ज्ञानो
दयात्पूर्वपूर्वकारणनिवृत्त्या निवृत्तिर्भवतीत्यर्थः॥२९॥ निवृत्तेषु किं भवतीत्यत आह॥ ॥तदा
सर्वावरणापेतस्य ज्ञानस्यानंत्याज्ज्ञेयमल्पं॥३०॥ ॥आव्रियते चित्तमेभिरिति आवरणानि क्लेशाः
तेभ्योपेतस्य तद्विरहितस्य ज्ञानस्य॥ निवृत्तवारिदशरद्गगनप्रतिमस्यानंत्यादनवच्छेदाज्ज्ञेयमल्पं॥
गणनास्पदं न भवति अक्लेशेनैव सर्वं ज्ञेयं जानातीत्यर्थः॥३०॥ ततः किमित्यत आह॥ ॥ततः कृ
तार्थानां परिणामक्रमसमाप्तिर्गुणानां॥३१॥ ॥कृतो निष्पादितो भोगापवर्गलक्षणः पुरुषार्थो
यैस्ते कृतार्था गुणाः सत्त्वरजस्तमांसि तेषां परिणामस्य आ पुरुषार्थसमाप्तेरानुलोम्येन प्रातिलोम्ये

नचांगांगीभावस्थितिलक्षणस्तस्य योसौ क्रमो वक्ष्यमाणस्तस्य परिसमाप्तिर्निष्ठा न पुनरुद्भवंतीत्यर्थः॥३१॥ क्रमस्योक्तस्य लक्षणमाह॥ ॥क्षणप्रतियोगीपरिणामोपरांतनिर्ग्राह्यः॥३२॥ ॥क्षणोल्पीयान्कालस्तस्य योसौ प्रतियोगी एकक्षणविलक्षणः परिणामोऽपरांतनिर्ग्राह्यः॥ अनुभूतेषु क्षणेषु पश्चात्संकलनाबुद्ध्यैव यो गृह्यते स क्षणानां क्रम उच्यते॥ नह्यननुभूतेषु क्षणेषु क्रमः परिज्ञातुं शक्यते॥३२॥ इदानीं फलभूतस्य कैवल्यस्याऽसाधारणं स्वरूपमाह॥ ॥पुरुषार्थशून्यानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति॥३३॥ ॥समाप्तभोगापवर्गलक्षणपुरुषार्थानां गुणानां यः प्रतिप्रसवः प्रतिलोमस्य परिणामस्य समाप्तौ विकारानुद्भवः॥ यदि वा चितिशक्तेर्वृत्तिसारूप्यनिवृत्तौ स्वरूपमात्रेणावस्थानं कैवल्यमुच्यते॥ पुनर्बुद्धिसत्त्वानधिगमे सति स्वरूपमात्रेत्ववस्थानं॥ न केवलमस्मद्दर्शने क्षेत्रज्ञः कैवल्यावस्थायामेवंभूतो दर्शनांतरेष्वपि विमृश्यमाण एवंरूप एवावतिष्ठते॥ तथाहि॥ संसारदशायामात्मा कर्तृत्वभोक्तृत्वानुसंधानमयः प्रतीयते॥ अन्यथा यद्ययमेकः क्षेत्रज्ञस्तथाविधो न स्यात्तदा ज्ञानक्षणानामेवपूर्वापरानुसंधानशून्यानां भावे नियतफलसंबंधो न स्यात्॥ कृतनाशाकृताभ्यागमप्रसंगश्च॥ यदि येनैव शास्त्रोपदिष्टमनुष्ठितं कर्म तस्यैव भोक्तृत्वं न भवेत्तदा हिताहितप्राप्तिपरिहारार्थाप्रवृत्तिः सर्वस्य घटेत॥ सर्वस्यैव व्यवहारस्य हानोपादानलक्षणस्यानुसंधा

नेनैव व्याप्तत्वात्तज्ज्ञानक्षणानां परस्परभेदेनानुसंधानशून्यत्वादनुसंधानाभावे कस्यचिद्व्यवहारस्यानुपपत्तेः कर्त्ता भोक्तानुसंधाता यः स आत्मेति व्यवस्थाप्यते॥ मोक्षदशायां तु सकलग्राह्यग्राहकलक्षणव्यवहाराभावाच्चैतन्यमात्रमेव तस्याऽवशिष्यते॥ तच्चैतन्यं चितिमात्रत्वेनैवोपपद्यते॥ न पुनरात्मसंवेदनेन यस्माद्विषयग्रहणसमर्थत्वमेव चितेरूपं नात्मग्राहकत्वं॥ तथाहि॥ अर्थप्रतीत्या गृह्यमाणोऽयमिति गृह्यते॥ स्वरूपं गृह्यमाणमहमिति॥ न पुनर्युगपद्बहिर्मुखतांतर्मुखतालक्षणं व्यापारद्वयं परस्परविरुद्धं कर्तुं शक्यं॥ अत एकस्मिन्समये व्यापारद्वयस्य कर्त्तुमशक्यत्वाच्चिद्रूपत्वेनावशिष्यते॥ अतो मोक्षावस्थायां निवृत्ताधिकारेषु गुणेषु चिन्मात्ररूप एवात्माऽवतिष्ठत इत्येवं युक्तं॥ संसारदशायां तु एवंभूतस्यैव कर्तृत्वभोक्तृत्वमनुसंधातृत्वं च सर्वमुपपद्यते॥ तथाहि॥ योयं प्रकृत्या सहानादिनैसर्गिकोऽस्य भोक्तृभोग्यभावलक्षणः संबंधोऽविवेकख्यातिमूलः तस्मिन्सति पुरुषार्थकर्तव्यतारूपशक्तिद्वयसद्भावे या महदादिभावेन परिणतिः तस्यां संयोगे सति यदात्मनोऽधिष्ठातृत्वं चिच्छायासमर्पणसामर्थ्यं बुद्धिसत्त्वस्य च संक्रांतचिच्छायाग्रहणसामर्थ्यं चिदवष्टब्धायाश्च बुद्धेर्येयं कर्तृत्वभोक्तृत्वाध्यवसायः तत एव सर्वस्यानुसंधानपूर्वकस्य व्यवहारस्य निष्पत्तेः किमन्यैःकल्पनैःकल्पनाजालैः॥ यदि पुनरेवंभूतनंगिव्यतिरेकेण पारमार्थिकमात्मनः कर्तृत्वाद्यंगीक्रियते तदास्य परिणामित्वप्रसंगः॥ परिणामित्वाच्चानित्यत्वे तस्यात्मत्वमेव न स्यात्॥ न ह्येकस्मिन्नेव समये एकेनैव रूपे

॥पा॰सू॰वृ॰॥ एषपरस्परविरुद्धावस्थानुभवः संभवति॥तथाहि॥यस्यामवस्थायामात्मसमवेतसुखेसमुत्पन्नेतस्या
॥५०॥ नुभवितृत्वेनतस्यामेवावस्थायांदुःखानुभवितृत्वं॥अतोवस्थायानानात्वात्तदभिन्नस्यावस्थावतो
पिनानात्वंनानात्वेनचपरिणामित्वान्नात्मत्वंनापिनित्यत्वं॥अतएवशांतब्रह्मवादिभिःसौख्येरा
त्मनःसदैवसंसारदशायांचैकरूपत्वमंगीकृतं॥येतुवेदांतवादिनश्चिदानंदमयत्वमात्मनोमोक्षे
मन्यंते॥तेषांनयुक्तःपक्षः॥तथाहि॥आनंदस्यसुखरूपत्वात्सुखस्यचसदैवसंवेद्यत्वेवप्रतिभा
सासंवेद्यमानत्वंचसंवेदनव्यतिरेकेणानुपपन्नमितिसंवेदनसंवेद्ययोरभ्युपगमादद्वैतहानिः॥
अथसुखात्मकमेवतत्प्रोच्यते॥नहिरुद्धधर्माध्यासादनुपपन्नं॥नहिसंवेद्यंसंवेदनंचैकंभवितुम
र्हति॥किंच॥अद्वैतवादिभिःकर्मात्मपरात्मभेदेनात्माद्विविधइष्यते॥तत्रयेनैवरूपेणसुखदुः
खभोक्तृत्वंकर्मात्मनस्तेनैवरूपेणयदिपरमात्मनःस्यात्॥तदाकर्मात्मवत्परमात्मनःपरिणामि
त्वमविद्यास्वभावत्वंचस्यात्॥अथतत्स्यसाक्षाद्भोक्तृत्वंकिंतुतदुपढौकितमुदासीनतयाधिष्ठात
त्वेनस्वीकरोतितदास्मद्दर्शनानुप्रवेशः॥आनंदरूपताचएवमेवनिरस्ता॥किंच॥विद्यास्वभाव
त्वेनिःस्वभावत्वात्कःशास्त्राधिकारी॥नतावन्नित्यमुक्तत्वात्परमात्मा॥नाप्यविद्यास्वभावत्वात्कर्मा
त्मा॥नतश्चशास्त्रवैयर्थ्यप्रसंगः॥अविद्यामयत्वेचजगतोंगीक्रियमाणेकस्याविद्येतिविचार्यतां॥
नतावत्परमात्मनोनित्यमुक्तत्वाद्विद्यास्वभावत्वाच्च॥कर्मात्मनोपिनिःस्वभावतयाशशविषाणप्र ॥४०॥

९धर्मस्यकस्यचित्प्रमाणेनानुपपत्तेः
केनचि

ख्यत्वेनकथमविद्यासंबंधः॥अथोच्येत॥एतदेवाविद्यायाअविद्यात्वंयदविचारितरमणीयत्वंनाम॥
येवहिविचारेणदिनकरकरस्पृष्टनीहारवद्विलयमुपयातिसैवाविद्येत्युच्यते॥नैवं॥यद्वस्तुकिंचि
त्कार्यंकरोतितदवश्यंकुतश्चिद्भिन्नमभिन्नंवावक्तव्यं॥अविद्यायाश्चसंसारलक्षणप्रपंचकार्यकर्तृत्व
मवश्यमंगीकर्तव्यं॥तस्मिन्सत्यपियद्यनिर्वाच्यत्वमुच्यतेतदाकस्यचिदपिवाच्यत्वंनस्यात्॥ब्रह्मण
ष्यवाच्यत्वप्रसक्तेः॥तस्मादधिष्ठातृरूपताव्यतिरेकेणनान्यदात्मनोरूपमुपपद्यते॥अधिष्ठातृत्वे
चचिद्रूपत्वमेवतद्व्यतिरिक्तस्यधर्माधर्मविज्ञानानुपपत्तेः॥यैरपिनैयायिकादिभिरात्माचेतनायोग
त्वेनेष्यते॥चेतनापितस्यमनःसंयोगजा॥तथाहि॥ज्ञानप्रयत्नादयोगुणास्तस्यव्यवहारदशाया
मात्मनःसंयोगादुत्पद्यंते॥तैरेवचगुणैःस्वयंज्ञाताकर्ताभोक्तेतिव्यपदिश्यते॥मोक्षदशायांतु
मिथ्याज्ञाननिवृत्तौतन्मूलानांदोषाणामपिनिवृत्तेस्तेषांबुद्ध्यादीनांविशेषगुणानामत्यंतोच्छित्तेःस्व
रूपमात्रप्रतिष्ठत्वमात्मनोंगीकृतं॥तेषांनयुक्तःपक्षः॥यतस्तस्यांदशायांकिमात्मनोरूपंनित्यत्व
व्यापकत्वादयोगुणाःआकाशादीनामपिसंतिअतस्तद्व्यतिरिक्तलक्षणेनात्मनःकिंचिद्रूपमवश्यमंगीक
र्तव्यं॥आत्मत्वजातियोगइतिचेत्सर्वस्यैवहिस्वजातियोगःसंभवति॥अतोजगद्विलक्षणमात्मनो
वश्यमंगीकर्तव्यं॥तच्चाधिष्ठातृत्वंचिद्रूपतयैवघटतेनान्यथा॥यैरपिमीमांसकैःकर्मकर्तृत्वस्व
रूपआत्मांगीक्रियतेतेषामपिनयुक्तःपक्षः॥तथाहि॥अहंप्रत्ययग्राह्यआत्मेतितेषांप्रतिज्ञा॥

॥पा॰स॰वृ॰ ऽपदंघस्ययेचकर्तृत्वंकर्मत्वंचात्मनएव॥नचैतद्विरुद्धत्वादुपपद्यते॥कर्तृत्वंप्रमातृत्वं॥कर्मत्वंचप्र
॥४१॥ मेयत्वं॥नचैतद्विरुद्धधर्माध्यासेयुगपदेकस्योपपद्यते॥यद्विरुद्धधर्माध्यस्तंनतदेकं॥यथाभाव
भावौ॥विरुद्धेचकर्तृत्वकर्मत्वे॥अत्रोच्यते॥नकर्तृत्वकर्मत्वयोर्विरोधः॥किंनुकर्तृत्वकरणत्व
योः॥केनैतदुक्तंविरुद्धधर्माध्यासस्यतुल्यत्वात्कर्तृत्वकरणत्वयोरेवविरोधोनकर्तृत्वकर्मत्वयोः॥
तस्मादहंप्रत्ययग्राह्यत्वंपवित्त्यात्मनोधिष्ठातृत्वमेवोपपन्नं॥नचचेतनत्वमेवंयेरपिद्रव्यत्वबो
धपर्यायिभेदेनात्मनोऽव्यापकस्यशरीरपरिणामस्यपरिणामित्वमिष्यतेतेषामुक्त्यानपरादृतएव
पक्षः॥परिणामित्वेचिद्रूपत्वहानिः॥चिद्रूपत्वाभावेकिमात्मनआत्मत्वं॥तस्मादात्मनआत्मत्वमि
च्छताचिद्रूपत्वमेवात्मनोंगीकर्तव्यं॥तच्चाधिष्ठातृत्वमेव॥केचित्तु॥कर्तृस्वरूपमेवात्मानमिच्छंति॥
तथाहि॥विषयसान्निध्येयाज्ञानलक्षणाक्रियासमुत्पन्नातस्याविषयसंवित्तिःफलं॥तस्यांचफल
रूपायांसंवित्तौस्वरूपंप्रकाशरूपतयाप्रतिभासते॥विषयश्चग्राह्यतयाआत्मनोग्राहकत्वेनघ
टमहंजानामीत्यनेनाकारेणतस्याःसमुत्पत्तेःक्रियायाश्चकारणंकर्तृत्वेनभवतीत्यतःकर्तृत्वंभोक्तृ
त्वंचात्मनोरूपमिति॥तदनुपपन्नं॥यस्मात्तासांसंवित्तीनांतत्किंकर्तृत्वंयुगपत्प्रतिपद्यते॥क्रमे संवित्
णवा॥युगपत्कर्तृत्वेक्षणांतरेषुकर्तृत्वंतस्यनस्यात्॥अथक्रमेणकर्तृत्वंतदेकरूपस्यनघटते॥
एकेनरूपेणचेत्तस्यकर्तृत्वंतदाएकस्यरूपस्यसदैवसन्निहितत्वात्सर्वमेवफलमेकरूपंस्यात्॥ ॥४१॥

अथनानारूपतयातस्यकर्तृत्वंतदापरिणामित्वान्नचिद्रूपत्वं॥अतश्चिद्रूपत्वमात्मनइच्छतानसाक्षा
त्कर्तृत्वमंगीकर्तव्यं॥यादृशमस्माभिश्चकर्तृत्वमात्मनःप्रतिपादितंकूटस्थनित्यचिद्रूपस्यतदेवो
पपन्नं॥एतेनस्वप्रकाशस्यात्मनोविषयसंवित्तिद्वाराग्राहकत्वमभिव्यज्यतेइतियेवदंतितेप्य
नेनैवनिराकृताः॥केचिद्विमर्शात्मकत्वेनात्मनःशब्दमयत्वमिच्छंति॥तथाहि॥नविमर्शव्यतिरे
केणचिद्रूपतानिरूपयितुंशक्या॥जडाद्धिकिलवैलक्षण्यंचिद्रूपत्वमुच्यते॥तच्चविमर्शव्यतिरेके
णनिरूप्यमाणंनान्यथावतिष्ठते॥तदनुपपन्नं॥इदमित्थमेवंरूपइतियोविचारःसविमर्शउच्य
ते॥सचास्मिताव्यतिरेकेणोत्थानमेवनलभते॥तथाह्यात्मनिउपजायमानोविमर्शोहमेवंभूतइ
त्यनेनाकारेणसंवेद्यतेततश्चाहंशब्दभिन्नस्यात्मलक्षणस्यार्थस्यतत्रस्फुरणाभावाद्विकल्परूपताभि स्यचित्त
क्रमः॥विकल्पश्चाध्यवसायात्माबुद्धिधर्मोनचिद्धर्मः॥कूटस्थनित्यत्वेनचित्तेःसदैकरूपत्वाच्चाहंका
रानुप्रवेशः॥तदनेनसविमर्शमात्मनःप्रतिपादयताबुद्धिरेवात्मत्वेनभ्रांत्याप्रतिपादिता॥नप्रका
शात्मनःपरस्यपुरुषस्यस्वरूपमवगतमिति॥इत्थंसर्वेष्वपिदर्शनेष्वधिष्ठातृत्वंविहायनान्यदात्म
नोरूपमुपपद्यते॥अधिष्ठातृत्वंचचिद्रूपत्वंतच्चजडाद्वैलक्षण्यमेवचिद्रूपतयायदधितिष्ठतित
देवभोग्यतांनयति॥यच्चचेतनानाधिष्ठितंतदेवसकलव्यवहारयोग्यंभवति॥एवंचसतितत्तत्
त्वात्प्रधानस्यव्यापारनिवृत्तौयदात्मनःकैवल्यमस्माभिरुक्तंतद्धिहायदर्शनांतराणामपिनाना

 गतिः॥ तस्मादिदमेवयुक्तंवृत्तिसारूप्यपरिहारेण स्वरूपप्रतिष्ठाचितिशक्तिः कैवल्यं॥ तदेवंसि
 द्ध्यंतरेभ्यो विलक्षणां सर्वसिद्धिमूर्द्धन्यभूतां समाधिसिद्धिमभिधाय जात्यंतरपरिणामलक्षणस्य
सिद्धिविशेषस्य प्रकृत्यापूरमेव कारणमुपपाद्य धर्मादीनां प्रतिबंधकनिवृत्तिमात्र एव सामर्थ्यमिति
प्रदर्श्य निर्माणचित्तानामस्मितामात्रादुद्भवइत्युक्त्वा तेषां च योगिचित्तमेवाधिष्ठायकमिति प्रदर्श्य योगि
चित्तस्याचित्तांतरवैलक्षण्यमभिधाय तत्कर्मणामलौकिकत्वं चोपपाद्य विपाकानुगुणानां च वासनाना
मभिव्यक्तिसामर्थ्यं कार्यकारणयोश्चैक्यप्रतिपादनेन व्यवहितानामपि च वासनानामानंतर्यमुपपाद्य
तासामानंत्येपि हेतुफलादिद्वारेण हानमुपदर्श्य अतीतादिषु धर्माणां सद्भावमुपपाद्य विज्ञानवादं नि
राकृत्य साकारवादं च प्रतिष्ठाप्य पुरुषस्य ज्ञातृत्वमुक्त्वा चित्तद्वारेण सकलव्यवहारनिष्पत्तिमुपपाद्य पु
रुषसिद्धौ प्रमाणमुपदर्श्य कैवल्यनिर्णयाय दशभिः सूत्रैः क्रमेणोपयोगिनोर्थानभिधाय शास्त्रांत
रेष्वप्येतदेव कैवल्यमित्युपपाद्य कैवल्यस्वरूपं निर्णीतमिति व्याकृतः कैवल्यपादः॥४॥ ॥सर्वे
ष्य वशाः प्रतापनृपतेः पादांतसेवानतिप्रह्वेश्वनृमुकुटेषु मूर्द्धसु दधत्याज्ञां धरित्रीभृतः॥ यद्व
क्त्रांबुजमाप्य गर्वमसमं वाग्देवतापि श्रिता सश्रीभोजपतिः फणाधिपतिलसत्सूत्रेषु वृत्तिं व्यधात्॥१॥
॥ ॥इति श्रीधारेश्वरराजाधिराजभोजदेवविरचितायां राजमार्तंडाभिधायां पातंजलयोगशास्त्रवृत्तौ कै
वल्यपादश्चतुर्थः समाप्तः॥ संवत् १८६७ शाके १७३२ श्रावणमासे कृष्णपक्षे १३ चंद्रवासरे श्रीगुरुक्षे ॥४२॥
रक्षेत्रे माधवानंदसरस्वत्या लिखितं पातंजलयोगशास्त्रं स्वपठनार्थं परोपकारार्थं च॥ शुभं भवतु॥ ॥